# adhyAtmarAmAyaNe araNyakANDam

# અધ્યાત્મરામાયણે અરણ્યકાણ્ડમ્

## Document Information

Text title : adhyAtma rAmAyaNa araNyakANDam

File name : adhyaatmaRamAra.itx

Category : adhyAtmarAmAyaNa, raama

Location : doc_raama

Author : Traditional

Transliterated by : Nagaraj Balijepalli <nagaraj at iastate.edu>

Proofread by : Nagaraj Balijepalli, Sunder Hattangadi, PSA Easwaran, ahimsasoldier

Description-comments : adhyAtma raamAyaNa

Latest update : July 22, 2006, April 4, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# અધ્યાત્મરામાયણે અરણ્યકાણ્ડમ્

## ॥ પ્રથમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ
અથ તત્ર દિનં સ્થિત્વા પ્રભાતે રઘુનન્દનઃ ।
સ્નાત્વા મુનિં સમામન્ત્ર્ય પ્રયાણાયોપચક્રમે ॥ ૧॥

મુને ગચ્છામહે સર્વે મુનિમણ્ડલમણ્ડિતમ્ ।
વિપિનં દણ્ડકં યત્ર ત્વમાજ્ઞાતુમિહાર્હસિ ॥ ૨॥

માર્ગપ્રદર્શનાર્થાય શિષ્યાનાજ્ઞપ્તુમર્હસિ ।
શ્રુત્વા રામસ્ય વચનં પ્રહસ્યાત્રિર્મહાયશાઃ ।
પ્રાહ તત્ર રઘુશ્રેષ્ઠં રામ રામ સુરાશ્રય ॥ ૩॥

સર્વસ્ય માર્ગદ્રષ્ટા ત્વં તવ કો માર્ગદર્શકઃ ।
તથાપિ દર્શયિષ્યન્તિ તવ લોકાનુસારિણઃ ॥ ૪॥

ઇતિ શિષ્યાન્ સમાદિશ્ય સ્વયં કિઞ્ચિત્તમન્વગાત્ ।
રામેણ વારિતઃ પ્રીત્યા અત્રિઃ સ્વભવનં યયૌ ॥ ૫॥

ક્રોશમાત્રં તતો ગત્વા દદર્શ મહતીં નદીમ્ ।
અત્રેઃ શિષ્યાનુવાચેદં રામો રાજીવલોચનઃ ॥ ૬॥

નદ્યાઃ સન્તરણે કશ્ચિદુપાયો વિદ્યતે ન વા ।
ઊચુસ્તે વિદ્યતે નૌકા સુદૃઢા રઘુનન્દન ॥ ૭॥

તારયિષ્યામહે યુષ્માન્ વયમેવ ક્ષણાદિહ ।
તતો નાવિ સમારોપ્ય સીતાં રાઘવલક્ષ્મણૌ ॥ ૮॥

ક્ષણાત્સન્તારયામાસુર્નદીં મુનિકુમારકાઃ ।
રામાભિનન્દિતાઃ સર્વે જગ્મુરત્રેરથાશ્રમમ્ ॥ ૯॥

તાવેત્ય વિપિનં ઘોરં ઝિલ્લીઝઙ્કારનાદિતમ્ ।

નાનામૃગગણાકીર્ણં સિંહવ્યાઘ્રાદિભીષણમ્ ॥ ૧૦॥

રાક્ષસૈર્ઘોરરૂપૈશ્ચ સેવિતં રોમહર્ષણમ્ ।
પ્રવિશ્ય વિપિનં ઘોરં રામો લક્ષ્મણમબ્રવીત્ ॥ ૧૧॥

ઇતઃ પરં પ્રયત્નેન ગન્તવ્યં સહિતેન મે ।
ધનુર્ગુણેન સંયોજ્ય શરાનપિ કરે દધત્ ॥ ૧૨॥

અગ્રે યાસ્યામ્યહં પશ્ચાત્ત્વમન્વેહિ ધનુર્ધર ।
આવયોર્મધ્યગા સીતા માયેવાત્મપરાત્મનોઃ ॥ ૧૩॥

ચક્ષુશ્ચારય સર્વત્ર દૃષ્ટં રક્ષોભયં મહત્ ।
વિદ્યતે દણ્ડકારણ્યે શ્રુતપૂર્વમરિન્દમ ॥ ૧૪॥

ઇત્યેવં ભાષમાણૌ તૌ જગ્મતુઃ સાર્ધયોજનમ્ ।
તત્રૈકા પુષ્કરિણ્યાસ્તે કલ્હારકુમુદોત્પલૈઃ ॥ ૧૫॥

અમ્બુજૈઃ શીતલોદેન શોભમાના વ્યદૃશ્યત ।
તત્સમીપમથો ગત્વા પીત્વા તત્સલિલં શુભમ્ ॥ ૧૬॥

ઊષુસ્તે સલિલાભ્યાશે ક્ષણં છાયામુપાશ્રિતાઃ ।
તતો દદૃશુરાયાન્તં મહાસત્ત્વં ભયાનકમ્ ॥ ૧૭॥

કરાલદંષ્ટ્રવદનં ભીષયન્તં સ્વગર્જિતૈઃ ।
વામાંસે ન્યસ્તશૂલાગ્રગ્રથિતાનેકમાનુષમ્ ॥ ૧૮॥

ભક્ષયન્તં ગજવ્યાઘ્રમહિષં વનગોચરમ્ ।
જ્યારોપિતં ધનુર્ધૃત્વા રામો લક્ષ્મણમબ્રવીત્ ॥ ૧૯॥

પશ્ય ભ્રાતર્મહાકાયો રાક્ષસોઽયમુપાગતઃ ।
આયાત્યભિમુખં નોઽગ્રે ભીરૂણાં ભયમાવહન્ ॥ ૨૦॥

સજ્જીકૃતધનુસ્તિષ્ઠ મા ભૈર્જનકનન્દિનિ ।
ઇત્યુક્ત્વા બાણમાદાય સ્થિતો રામ ઇવાચલઃ ॥ ૨૧॥

સ તુ દૃષ્ટ્વા રમાનાથં લક્ષ્મણં જાનકીં તદા ।
અટ્ટહાસં તતઃ કૃત્વા ભીષયન્નિદમબ્રવીત્ ॥ ૨૨॥

કૌ યુવાં બાણતૂણીરજટાવલ્કલધારિણૌ ।
મુનિવેષધરૌ બાલૌ સ્ત્રીસહાયૌ સુદુર્મદૌ ॥ ૨૩॥

સુન્દરૌ બત મે વક્ત્રપ્રવિષ્ટકવલોપમૌ ।
કિમર્થમાગતૌ ઘોરં વનં વ્યાલનિષેવિતમ્ ॥ ૨૪॥

શ્રુત્વા રક્ષોવચો રામઃ સ્મયમાન ઉવાચ તમ્ ।
અહં રામસ્ત્વયં ભ્રાતા લક્ષ્મણો મમ સમ્મતઃ ॥ ૨૫॥

એષા સીતા મમ પ્રાણવલ્લભા વયમાગતાઃ ।
પિતૃવાક્યં પુરસ્કૃત્ય શિક્ષણાર્થં ભવાદૃશામ્ ॥ ૨૬॥

શ ृत्वा તદ્રામવચનમટ્ટહાસમથાકરોત્ ।
વ્યાદાય વક્ત્રં બાહુભ્યાં શૂલમાદાય સત્વરઃ ॥ ૨૭॥

માં ન જાનાસિ રામ ત્વં વિરાધં લોકવિશ્રુતમ્ ।
મદ્ભયાન્મુનયઃ સર્વે ત્યક્ત્વા વનમિતો ગતાઃ ॥ ૨૮॥

યદિ જીવિતુમિચ્છાસ્તિ ત્યક્ત્વા સીતાં નિરાયુધૌ ।
પલાયત ન ચેચ્છીઘ્રં ભક્ષયામિ યુવામહમ્ ॥ ૨૯॥

ઇત્યુક્ત્વા રાક્ષસઃ સીતામાદાતુમભિદુદ્રુવે ।
રામશ્ચિચ્છેદ તદ્બાહૂ શરેણ પ્રહસન્નિવ ॥ ૩૦॥

તતઃ ક્રોધપરીતાત્મા વ્યાદાય વિકટં મુખમ્ ।
રામમભ્યદ્રવદ્રામશ્ચિચ્છેદ પરિધાવતઃ ॥ ૩૧॥

પદદ્વયં વિરાધસ્ય તદદ્ભુતમિવાભવત્ ॥ ૩૨॥

તતઃ સર્પ ઇવાસ્યેન ગ્રસિતું રામમાપતત્ ।
તતોઽર્ધચન્દ્રાકારેણ બાણેનાસ્ય મહચ્છિરઃ ॥ ૩૩॥

ચિચ્છેદ રુધિરૌઘેણ પપાત ધરણીતલે ।
તતઃ સીતા સમાલિઙ્ગ્ય પ્રશશંસ રઘૂત્તમમ્ ॥ ૩૪॥

તતો દુન્દુભયો નેદુર્દિવિ દેવગણેરિતાઃ ।
નનૃતુશ્ચાપ્સરા હૃષ્ટા જગુર્ગન્ધર્વકિન્નરાઃ ॥ ૩૫॥

વિરાધકાયાદતિસુન્દરાકૃતિઃ
  વિભ્રાજમાનો વિમલામ્બરાવૃતઃ ।
પ્રતપ્તચામીકરચારુભૂષણો
  વ્યદૃશ્યતાગ્રે ગગને રવિર્યથા ॥ ૩૬॥

પ્રણમ્ય રામં પ્રણતાર્તિહારિણં

ભવપ્રવાહોપરમં ઘૃણાકરમ્ ।
પ્રણમ્ય ભૂયઃ પ્રણનામ દણ્ડવત્
પ્રપન્નસર્વાર્તિહરં પ્રસન્નધીઃ ॥ ૩૭॥

વિરાધ ઉવાચ
શ્રીરામ રાજીવદલાયતાક્ષ
વિદ્યાધરોઽહં વિમલપ્રકાશઃ ।
દુર્વાસસાકારણકોપમૂર્તિના
શપ્તઃ પુરા સોઽદ્ય વિમોચિતસ્ત્વયા ॥ ૩૮॥

ઇતઃ પરં ત્વચ્ચરણારવિન્દયોઃ
સ્મૃતિઃ સદા મેઽસ્તુ ભવોપશાન્તયે ।
ત્વન્નામસઙ્કીર્તનમેવ વાણી
કરોતુ મે કર્ણપુટં ત્વદીયમ્ ॥ ૩૯॥

કથામૃતં પાતુ કરદ્વયં તે
પાદારવિન્દાર્ચનમેવ કુર્યાત્ ।
શિરશ્ચ તે પાદયુગપ્રણામં
કરોતુ નિત્યં ભવદીયમેવમ્ ॥ ૪૦॥

નમસ્તુભ્યં ભગવતે વિશુદ્ધજ્ઞાનમૂર્તયે ।
આત્મારામાય રામાય સીતારામાય વેધસે ॥ ૪૧॥

પ્રપન્નં પાહિ માં રામ યાસ્યામિ ત્વદનુજ્ઞયા ।
દેવલોકં રઘુશ્રેષ્ઠ માયા માં મા વૃણોતુ તે ॥ ૪૨॥

ઇતિ વિજ્ઞાપિતસ્તેન પ્રસન્નો રઘુનન્દનઃ ।
દદૌ વરં તદા પ્રીતો વિરાધાય મહામતિઃ ॥ ૪૩॥

ગચ્છ વિદ્યાધરાશેષમાયાદોષગુણા જિતાઃ ।
ત્વયા મદ્દર્શનાત્સદ્યો મુક્તો જ્ઞાનવતાં વરઃ ॥ ૪૪॥

મદ્ભક્તિર્દુર્લભા લોકે જાતા ચેન્મુક્તિદા યતઃ ।
અતસ્ત્વં ભક્તિસમ્પન્નઃ પરં યાહિ મમાજ્ઞયા ॥ ૪૫॥

રામેણ રક્ષોનિધનં સુઘોરં
શાપાદ્વિમુક્તિર્વરદાનમેવમ્ ।
વિદ્યાધરત્વં પુનરેવ લબ્ધં

રામં ગૃણન્નેતિ નરોઽખિલાર્થાન્ ॥ ૪૬॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અરણ્યકાણ્ડે પ્રથમઃ સર્ગઃ ॥ ૧॥

## ॥ દ્વિતીયઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ
વિરાધે સ્વર્ગતે રામો લક્ષ્મણેન ચ સીતયા ।
જગામ શરભઙ્ગસ્ય વનં સર્વસુખાવહમ્ ॥ ૧॥

શરભઙ્ગસ્તતો દૃષ્ટ્વા રામં સૌમિત્રિણા સહ ।
આયાન્તં સીતયા સાર્ધં સમ્ભ્રમાદુત્થિતઃ સુધીઃ ॥ ૨॥

અભિગમ્ય સુસમ્પૂજ્ય વિષ્ટરેષૂપવેશયત્ ।
આતિથ્યમકરોત્તેષાં કન્દમૂલફલાદિભિઃ ॥ ૩॥

પ્રીત્યાઽઽહ શરભઙ્ગોઽપિ રામં ભક્તિપરાયણમ્ ।
બહુકાલમિહૈવાઽઽસં તપસે કૃતનિશ્ચયઃ ॥ ૪॥

અદ્ય મત્તપસા સિદ્ધં યત્પુણ્યં બહુ વિદ્યતે ।
તત્સર્વં તવ દાસ્યામિ તતો મુક્તિં વ્રજામ્યહમ્ ॥ ૫॥

સમર્પ્ય રામસ્ય મહત્સુપુણ્યફલં
વિરક્તઃ શરભઙ્ગયોગી ।
ચિતિં સમારોહયદપ્રમેયં
રામં સસીતં સહસા પ્રણમ્ય ॥ ૬॥

ધ્યાયન્ચિરં રામમશેષહૃત્સ્થં
દૂર્વાદલશ્યામલમમ્બુજાક્ષમ્ ।
ચીરામ્બરં સ્નિગ્ધજટાકલાપં
સીતાસહાયં સહલક્ષ્મણં તમ્ ॥ ૭॥

કો વા દયાલુઃ સ્મૃતકામધેનુરન્યો
જગત્યાં રઘુનાયકાદહો ।
સ્મૃતો મયા નિત્યમનન્યભાજા

જ્ઞાત્વા સ્મૃતિં મે સ્વયમેવ યાતઃ ॥ ૮॥

પશ્યત્ત્વિદાનીં દેવેશો રામો દાશરથિઃ પ્રભુઃ ।
દગ્ધ્વા સ્વદેહં ગચ્છામિ બ્રહ્મલોકમકલ્મષઃ ॥ ૯॥

અયોધ્યાધિપતિર્મેઽસ્તુ હૃદયે રાઘવઃ સદા ।
યદ્વામાઙ્કે સ્થિતા સીતા મેઘસ્યેવ તટિલ્લતા ॥ ૧૦॥

ઇતિ રામં ચિરં ધ્યાત્વા દૃષ્ટ્વા ચ પુરતઃ સ્થિતમ્ ।
પ્રજ્વાલ્ય સહસા વહ્નિં દગ્ધ્વા પઞ્ચાત્મકં વપુઃ ॥ ૧૧॥

દિવ્યદેહધરઃ સાક્ષાદ્યયૌ લોકપતેઃ પદમ્ ।
તતો મુનિગણાઃ સર્વે દણ્ડકારણ્યવાસિનઃ ।
આજગ્મૂ રાઘવં દ્રષ્ટું શરભઙ્ગનિવેશનમ્ ॥ ૧૨॥

દૃષ્ટ્વા મુનિસમૂહં તં જાનકીરામલક્ષ્મણાઃ ।
પ્રણેમુઃ સહસા ભૂમૌ માયામાનુષરૂપિણઃ ॥૧૩॥

આશીર્ભિરભિનન્દ્યાથ રામં સર્વહૃદિ સ્થિતમ્ ।
ઊચુઃ પ્રાઞ્જલયઃ સર્વે ધનુર્બાણધરં હરિમ્ ॥ ૧૪॥

ભૂમેર્ભારાવતારાય જાતોઽસિ બ્રહ્મણાર્થિતઃ ।
જાનીમસ્ત્વાં હરિં લક્ષ્મીં જાનકીં લક્ષ્મણં તથા ॥ ૧૫॥

શેષાંશં શઙ્ખચક્રે દ્વે ભરતં સાનુજં તથા ।
અતશ્ચાદૌ ઋષીણાં ત્વં દુઃખં મોક્તુમિહાર્હસિ ॥ ૧૬॥

આગચ્છ યામો મુનિસેવિતાનિ
વનાનિ સર્વાણિ રઘૂત્તમ ક્રમાત્ ।
દ્રષ્ટું સુમિત્રાસુતજાનકીભ્યાં
તદા દયાઽસ્માસુ દૃઢા ભવિષ્યતિ ॥ ૧૭॥

ઇતિ વિજ્ઞાપિતો રામઃ કૃતાઞ્જલિપુટૈર્વિભુઃ ।
જગામ મુનિભિઃ સાર્ધં દ્રષ્ટું મુનિવનાનિ સઃ ॥ ૧૮॥

દદર્શ તત્ર પતિતાન્યનેકાનિ શિરાંસિ સઃ ।
અસ્થિભૂતાનિ સર્વત્ર રામો વચનમબ્રવીત્ ॥ ૧૯॥

અસ્થીનિ કેષામેતાનિ કિમર્થં પતિતાનિ વૈ ।
તમૂચુર્મુનયો રામ ઋષીણાં મસ્તકાનિ હિ ॥ ૨૦॥

રાક્ષસૈર્ભક્ષિતાનીશ પ્રમત્તાનાં સમાધિતઃ ॥
અન્તરાયં મુનીનાં તે પશ્યન્તોઽનુચરન્તિ હિ ॥ ૨૧॥

શ્રુત્વા વાક્યં મુનીનાં સ ભયદૈન્યસમન્વિતમ્ ।
પ્રતિજ્ઞામકરોદ્રામો વધાયાશેષરક્ષસામ્ ॥ ૨૨॥

પૂજ્યમાનઃ સદા તત્ર મુનિભિર્વનવાસિભિઃ ।
જાનક્યા સહિતો રામો લક્ષ્મણેન સમન્વિતઃ ॥ ૨૩॥

ઉવાસ કતિચિત્તત્ર વર્ષાણિ રઘુનન્દનઃ ।
એવં ક્રમેણ સમ્પશ્યન્નૃષીણામાશ્રમાન્ વિભુઃ ॥ ૨૪॥

સુતીક્ષ્ણસ્યાશ્રમં પ્રાગાત્પ્રખ્યાતમૃષિસઙ્કુલમ્ ।
સર્વર્તુગુણસમ્પન્નં સર્વકાલસુખાવહમ્ ॥ ૨૫॥

રામમાગતમાકર્ણ્ય સુતીક્ષ્ણઃ સ્વયમાગતઃ ।
અગસ્ત્યશિષ્યો રામસ્ય  મન્ત્રોપાસનતત્પરઃ ।
વિધિવત્પૂજયામાસ ભક્ત્યુત્કણ્ઠિતલોચનઃ ॥ ૨૬॥

સુતીક્ષ્ણ ઉવાચ

ત્વન્મન્ત્રજાપ્યહમનન્તગુણાપ્રમેય
સીતાપતે શિવવિરિઞ્ચિસમાશ્રિતાઙ્ઘ્રે ।
સંસારસિન્ધુતરણામલપોતપાદ
રામાભિરામ સતતં તવ દાસદાસઃ ॥ ૨૭॥

મામદ્ય સર્વજગતામવિગોચરસ્ત્વં
ત્વન્માયયા સુતકલત્રગૃહાન્ધકૂપે ।
મગ્નં નિરીક્ષ્ય મલપુદ્ગલપિણ્ડમોહ-
પાશાનુબદ્ધહૃદયં સ્વયમાગતોઽસિ ॥ ૨૮॥

ત્વં સર્વભૂતહૃદયેષુ કૃતાલયોઽપિ
ત્વન્મન્ત્રજાપ્યવિમુખેષુ તનોષિ માયામ્ ।
ત્વન્મન્ત્રસાધનપરેષ્વપયાતિ માયા
સેવાનુરૂપફલદોઽસિ યથા મહીપઃ ॥ ૨૯॥

વિશ્વસ્ય સૃષ્ટિલયસંસ્થિતિહેતુરેકઃ
ત્વં માયયા ત્રિગુણયા વિધિરીશવિષ્ણૂ ।
ભાસીશ મોહિતધિયાં વિવિધાકૃતિસ્ત્વં

યદ્વદ્રવિઃ સલિલપાત્રગતો હ્યનેકઃ ॥ ૩૦॥

પ્રત્યક્ષતોઽદ્ય ભવતશ્ચરણારવિન્દં
પશ્યામિ રામ તમસઃ પરતઃ સ્થિતસ્ય ।
દૃગ્રૂપતસ્ત્વમસતામવિગોચરોઽપિ
ત્વન્મન્ત્રપૂતહૃદયેષુ સદા પ્રસન્નઃ ॥ ૩૧॥

પશ્યામિ રામ તવ રૂપમરૂપિણોઽપિ
માયાવિડમ્બનકૃતં સુમનુષ્યવેષમ્ ।
કન્દર્પકોટિસુભગં કમનીયચાપબાણં
દયાર્દ્રહૃદયં સ્મિતચારુવક્ત્રમ્ ॥ ૩૨॥

સીતાસમેતમજિનામ્બરમપ્રધૃષ્યં
સૌમિત્રિણા નિયતસેવિતપાદપદ્મમ્ ।
નીલોત્પલદ્યુતિમનન્તગુણં પ્રશાન્તં
મદ્ભાગધેયમનિશં પ્રણમામિ રામમ્ ॥ ૩૩॥

જાનન્તુ રામ તવ રૂપમશેષદેશ-
કાલાદ્યુપાધિરહિતં ઘનચિત્પ્રકાશમ્ ।
પ્રત્યક્ષતોઽદ્ય મમ ગોચરમેતદેવ
રૂપં વિભાતુ હૃદયે ન પરં વિકાઙ્ક્ષે ॥ ૩૪॥

ઇત્યેવં સ્તુવતસ્તસ્ય રામઃ સસ્મિતમબ્રવીત્ ।
મુને જાનામિ તે ચિત્તં નિર્મલં મદુપાસનાત્ ॥ ૩૫॥

અતોઽહમાગતો દ્રષ્ટું મદૃતે નાન્યસાધનમ્ ।
મન્મન્ત્રોપાસકા લોકે મામેવ શરણં ગતાઃ ॥ ૩૬॥

નિરપેક્ષા નાન્યગતાસ્તેષાં દૃશ્યોઽહમન્વહમ્ ।
સ્તોત્રમેતત્પઠેદ્યસ્તુ ત્વત્કૃતં મત્પ્રિયં સદા ॥ ૩૭॥

સદ્ભક્તિર્મે ભવેત્તસ્ય જ્ઞાનં ચ વિમલં ભવેત્ ।
ત્વં મમોપાસનાદેવ વિમુક્તોઽસીહ સર્વતઃ ॥ ૩૮॥

દેહાન્તે મમ સાયૂજ્યં લપ્સ્યસે નાત્ર સંશયઃ ।
ગુરું તે દ્રષ્ટુમિચ્છામિ હ્યગસ્ત્યં મુનિનાયકમ્ ।
કિઞ્ચિત્કાલં તત્ર વસ્તું મનો મે ત્વરયત્યલમ્ ॥ ૩૯॥

સુતીક્ષ્ણોઽપિ તથેત્યાહ શ્વો ગમિષ્યસિ રાઘવ ।

અહમપ્યાગમિષ્યામિ ચિરાદ્ દૃષ્ટો મહામુનિઃ ॥ ૪૦॥

અથ પ્રભાતે મુનિના સમેતો
રામઃ સસીતઃ સહ લક્ષ્મણેન ।
અગસ્ત્યસમ્ભાષણલોલમાનસઃ
શનૈરગસ્ત્યાનુજમન્દિરં યયૌ ॥ ૪૧॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અરણ્યકાણ્ડે દ્વિતીયઃ સર્ગઃ ॥ ૨॥

## ॥ તૃતીયઃ સર્ગઃ ॥

અથ રામઃ સુતીક્ષ્ણેન જાનક્યા લક્ષ્મણેન ચ ।
અગસ્ત્યસ્યાનુજસ્થાનં મધ્યાહ્ને સમપદ્યત ॥ ૧॥

તેન સમ્પૂજિતઃ સમ્યગ્ભુક્ત્વા મૂલફલાદિકમ્ ।
પરેદ્યુઃ પ્રાતરુત્થાય જગ્મુસ્તેઽગસ્ત્યમણ્ડલમ્ ॥ ૨॥

સર્વર્તુફલપુષ્પાઢ્યં નાનામૃગગણૈર્યુતમ્ ।
પક્ષિસઙ્ઘૈશ્ચ વિવિધૈર્નાદિતં નન્દનોપમમ્ ॥ ૩॥

બ્રહ્મર્ષિભિર્દેવર્ષિભિઃ સેવિતં મુનિમન્દિરૈઃ ।
સર્વતોઽલઙ્કૃતં સાક્ષાદ્ બ્રહ્મલોકમિવાપરમ્ ॥ ૪॥

બહિરેવાશ્રમસ્યાથ સ્થિત્વા રામોઽબ્રવીન્મુનિમ્ ।
સુતીક્ષ્ણ ગચ્છ ત્વં શીઘ્રમાગતં માં નિવેદય ॥ ૫॥

અગસ્ત્યમુનિવર્યાય સીતયા લક્ષ્મણેન ચ ।
મહાપ્રસાદ ઇત્યુક્ત્વા સુતીક્ષ્ણઃ પ્રયયૌ ગુરોઃ ॥ ૬॥

આશ્રમં ત્વરયા તત્ર ઋષિસઙ્ઘસમાવૃતમ્ ।
ઉપવિષ્ટં રામભક્તૈર્વિશેષેણ સમાયુતમ્ ॥ ૭॥

વ્યાખ્યાતરામમન્ત્રાર્થં શિષ્યેભ્યશ્ચાતિભક્તિતઃ ।
દૃષ્ટ્વાગસ્ત્યં મુનિશ્રેષ્ઠં સુતીક્ષ્ણઃ પ્રયયૌ મુનેઃ ॥ ૮॥

દણ્ડવત્પ્રણિપત્યાહ વિનયાવનતઃ સુધીઃ ।
રામો દાશરથિર્બ્રહ્મન્ સીતયા લક્ષ્મણેન ચ ।

આગતો દર્શનાર્થં તે બહિસ્તિષ્ઠતિ સાઞ્જલિઃ ॥ ૯॥

અગસ્ત્ય ઉવાચ

શીઘ્રમાનય ભદ્રં તે રામં મમ હૃદિસ્થિતમ્ ।
તમેવ ધ્યાયમાનોઽહં કાઙ્ક્ષમાણોઽત્ર સંસ્થિતઃ ॥ ૧૦॥

ઇત્યુક્ત્વા સ્વયમુત્થાય મુનિભિઃ સહિતો દ્રુતમ્ ।
અભ્યગાત્પરયા ભક્ત્યા ગત્વા રામમથાબ્રવીત્ ॥ ૧૧॥

આગચ્છ રામ ભદ્રં તે દિષ્ટ્યા તેઽદ્ય સમાગમઃ ।
પ્રિયાતિથિર્મમ પ્રાપ્તોઽસ્યદ્ય મે સફલં દિનમ્ ॥ ૧૨॥

રામોઽપિ મુનિમાયાન્તં દૃષ્ટ્વા હર્ષસમાકુલઃ ।
સીતયા લક્ષ્મણેનાપિ દણ્ડવત્પતિતો ભુવિ ॥ ૧૩॥

દ્રુતમુત્થાપ્ય મુનિરાડ્ રામમાલિઙ્ગ્ય ભક્તિતઃ ।
તદ્ગાત્રસ્પર્શજાહ્લાદસ્રવન્નેત્રજલાકુલઃ ॥ ૧૪॥

ગૃહીત્વા કરમેકેન કરેણ રઘુનન્દનમ્ ।
જગામ સ્વાશ્રમં હૃષ્ટો મનસા મુનિપુઙ્ગવઃ ॥ ૧૫॥

સુખોપવિષ્ટં સમ્પૂજ્ય પૂજયા બહુવિસ્તરમ્ ।
ભોજયિત્વા યથાન્યાયં ભોજ્યૈર્વન્યૈરનેકધા ॥ ૧૬॥

સુખોપવિષ્ટમેકાન્તે રામં શશિનિભાનનમ્ ।
કૃતાઞ્જલિરુવાચેદમગસ્ત્યો ભગવાનૃષિઃ ॥ ૧૭॥

ત્વદાગમનમેવાહં પ્રતીક્ષન્ સમવસ્થિતઃ ।
યદા ક્ષીરસમુદ્રાન્તે બ્રહ્મણા પ્રાર્થિતઃ પુરા ॥ ૧૮॥

ભૂમેર્ભારાપનુત્ત્યર્થં રાવણસ્ય વધાય ચ ।
તદાદિ દર્શનાકાઙ્ક્ષી તવ રામ તપશ્ચરન્ ।
વસામિ મુનિભિઃ સાર્ધં ત્વામેવ પરિચિન્તયન્ ॥ ૧૯॥

સૃષ્ટેઃ પ્રાગેક એવાસીર્નિર્વિકલ્પોઽનુપાધિકઃ ।
ત્વદાશ્રયા ત્વદ્વિષયા માયા તે શક્તિરુચ્યતે ॥ ૨૦॥

ત્વામેવ નિર્ગુણં શક્તિરાવૃણોતિ યદા તદા ।
અવ્યાકૃતમિતિ પ્રાહુર્વેદાન્તપરિનિષ્ઠિતાઃ ॥ ૨૧॥

મૂલપ્રકૃતિરિત્યેકે પ્રાહુર્માયેતિ કેચન ।

અવિદ્યા સંસૃતિર્બન્ધ ઇત્યાદિ બહુધોચ્યતે ॥ ૨૨॥

ત્વયા સઙ્ક્ષોભ્યમાણા સા મહત્તત્ત્વં પ્રસૂયતે ।
મહત્તત્ત્વાદહઙ્કારસ્ત્વયા સઞ્ચોદિતાદભૂત્ ॥ ૨૩॥

અહઙ્કારો મહત્તત્ત્વસંવૃતસ્ત્રિવિધોઽભવત્ ।
સાત્ત્વિકો રાજસશ્ચૈવ તામસશ્ચેતિ ભણ્યતે ॥ ૨૪॥

તામસાત્સૂક્ષ્મતન્માત્રાણ્યાસન્ ભૂતાન્યતઃ પરમ્ ।
સ્થૂલાનિ ક્રમશો રામ ક્રમોત્તરગુણાનિ હ ॥ ૨૫॥

રાજસાનીન્દ્રિયાણ્યેવ સાત્ત્વિકા દેવતા મનઃ ।
તેભ્યોઽભવત્સૂત્રરૂપં લિઙ્ગં સર્વગતં મહત્ ॥ ૨૬॥

તતો વિરાટ્ સમુત્પન્નઃ સ્થૂલાદ્ભૂતકદમ્બકાત્ ।
વિરાજઃ પુરુષાત્સર્વં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૨૭॥

દેવતિર્યઙ્મનુષ્યાશ્ચ કાલકર્મક્રમેણ તુ ।
ત્વં રજોગુણતો બ્રહ્મા જગતઃ સર્વકારણમ્ ॥ ૨૮॥

સત્ત્વાદ્વિષ્ણુસ્ત્વમેવાસ્ય પાલકઃ સદ્ભિરુચ્યતે ।
લયે રુદ્રસ્ત્વમેવાસ્ય ત્વન્માયાગુણભેદતઃ ॥ ૨૯॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યા વૃત્તયો બુદ્ધિજૈર્ગુણૈઃ ।
તાસાં વિલક્ષણો રામ ત્વં સાક્ષી ચિન્મયોઽવ્યયઃ ॥ ૩૦॥

સૃષ્ટિલીલાં યદા કર્તુમીહસે રઘુનન્દન ।
અઙ્ગીકરોષિ માયાં ત્વં તદા વૈ ગુણવાનિવ ॥ ૩૧॥

રામ માયા દ્વિધા ભાતિ વિદ્યાઽવિદ્યેતિ તે સદા ।
પ્રવૃત્તિમાર્ગનિરતા અવિદ્યાવશવર્તિનઃ ।
નિવૃત્તિમાર્ગનિરતા વેદાન્તાર્થવિચારકાઃ ॥ ૩૨॥

ત્વદ્ભક્તિનિરતા યે ચ તે વૈ વિદ્યામયાઃ સ્મૃતાઃ ।
અવિદ્યાવશગા યે તુ નિત્યં સંસારિણશ્ચ તે ।
વિદ્યાભ્યાસરતા યે તુ નિત્યમુક્તાસ્ત એવ હિ ॥ ૩૩॥

લોકે ત્વદ્ભક્તિનિરતાસ્ત્વન્મન્ત્રોપાસકાશ્ચ યે ।
વિદ્યા પ્રાદુર્ભવેત્તેષાં નેતરેષાં કદાચન ॥ ૩૪॥

અતસ્ત્વદ્ભક્તિસમ્પન્ના મુક્તા એવ ન સંશયઃ ।

ત્વદ્ભક્ત્યમૃતહીનાનાં મોક્ષઃ સ્વપ્નેઽપિ નો ભવેત્ ॥ ૩૫॥

કિં રામ બહુનોક્તેન સારં કિઞ્ચિદ્બ્રવીમિ તે ।
સાધુસઙ્ગતિરેવાત્ર મોક્ષહેતુરુદાહૃતા ॥ ૩૬॥

સાધવઃ સમચિત્તા યે નિઃસ્પૃહા વિગતૈષિણઃ ।
દાન્તાઃ પ્રશાન્તાસ્ત્વદ્ભક્તા નિવૃત્તાખિલકામનાઃ ॥ ૩૭॥

ઇષ્ટપ્રાપ્તિવિપત્ત્યોશ્ચ સમાઃ સઙ્ગવિવર્જિતાઃ ।
સન્ન્યસ્તાખિલકર્માણઃ સર્વદા બ્રહ્મતત્પરાઃ ॥ ૩૮॥

યમાદિગુણસમ્પન્નાઃ સન્તુષ્ટા યેન કેનચિત્ ।
સત્સઙ્ગમો ભવેદ્યર્હિ ત્વત્કથાશ્રવણે રતિઃ ॥ ૩૯॥

સમુદેતિ તતો ભક્તિસ્ત્વયિ રામ સનાતને ।
ત્વદ્ભક્તાવુપપન્નાયાં વિજ્ઞાનં વિપુલં સ્ફુટમ્ ॥ ૪૦॥

ઉદેતિ મુક્તિમાર્ગોઽયમાદ્યશ્ચતુરસેવિતઃ ।
તસ્માદ્રાઘવ સદ્ભક્તિસ્ત્વયિ મે પ્રેમલક્ષણા ॥ ૪૧॥

સદા ભૂયાદ્ધરે સઙ્ગસ્ત્વદ્ભક્તેષુ વિશેષતઃ ।
અદ્ય મે સફલં જન્મ ભવત્સન્દર્શનાદભૂત્ ॥ ૪૨॥

અદ્ય મે ક્રતવઃ સર્વે બભૂવુઃ સફલાઃ પ્રભો ।
દીર્ઘકાલં મયા તપ્તમનન્યમતિના તપઃ ।
તસ્યેહ તપસો રામ ફલં તવ યદર્ચનમ્ ॥ ૪૩॥

સદા મે સીતયા સાર્ધં હૃદયે વસ રાઘવ ।
ગચ્છતસ્તિષ્ઠતો વાપિ સ્મૃતિઃ સ્યાન્મે સદા ત્વયિ ॥ ૪૪॥

ઇતિ સ્તુત્વા રમાનાથમગસ્ત્યો મુનિસત્તમઃ ।
દદૌ ચાપં મહેન્દ્રેણ રામાર્થે સ્થાપિતં પુરા ॥ ૪૫॥

અક્ષય્યૌ બાણતૂણીરૌ ખડ્ગો રત્નવિભૂષિતઃ ।
જહિ રાઘવ ભૂભારભૂતં રાક્ષસમણ્ડલમ્ ॥ ૪૬॥

યદર્થમવતીર્ણોઽસિ માયયા મનુજાકૃતિઃ ।
ઇતો યોજનયુગ્મે તુ પુણ્યકાનનમણ્ડિતઃ ॥ ૪૭॥

અસ્તિ પઞ્ચવટીનામ્ના આશ્રમો ગૌતમીતટે ।
નેતવ્યસ્તત્ર તે કાલઃ શેષો રઘુકુલોદ્વહ ॥ ૪૮॥

તત્રૈવ બહુકાર્યાણિ દેવાનાં કુરુ સત્પતે ॥ ૪૯॥

શ્રુત્વા તદાગસ્ત્યસુભાષિતં વચઃ
    સ્તોત્રં ચ તત્ત્વાર્થસમન્વિતં વિભુઃ ।
મુનિં સમાભાષ્ય મુદાન્વિતો યયૌ
    પ્રદર્શિતં માર્ગમશેષવિદ્ધરિઃ ॥ ૫૦॥

ઇતિ શ્રીમદધ્યાત્મરામયણે ઉમામહેશ્વરસંવાદે
  અરણ્યકાણ્ડે તૃતીયઃ સર્ગઃ ॥ ૩॥

## ॥ ચતુર્થઃ સર્ગઃ ॥

શ્રી મહાદેવ ઉવાચ
માર્ગે વ્રજન્ દદર્શાથ શૈલશૃઙ્ગમિવ સ્થિતમ્ ।
વૃદ્ધં જટાયુષં રામઃ કિમેતદિતિ વિસ્મિતઃ ॥ ૧॥

ધનુરાનય સૌમિત્રે રાક્ષસોઽયં પુરઃ સ્થિતઃ ।
ઇત્યાહ લક્ષ્મણં રામો હનિષ્યામ્યૃષિભક્ષકમ્ ॥ ૨॥

તચ્છ્રુત્વા રામવચનં ગૃધ્રરાડ્ ભયપીડિતઃ ।
વધાર્હોઽહં ન તે રામ પિતુસ્તેઽહં પ્રિયઃ સખા ॥ ૩॥

જટાયુર્નામ ભદ્રં તે ગૃધ્રોઽહં પ્રિયકૃત્તવ ॥ ૪॥

પઞ્ચવટ્યામહં વત્સ્યે તવૈવ પ્રિયકામ્યયા ।
મૃગયાયાં કદાચિત્તુ પ્રયાતે લક્ષ્મણેઽપિ ચ ॥ ૫॥

સીતા જનકકન્યા મે રક્ષિતવ્યા પ્રયત્નતઃ ।
શ્રુત્વા તદ્ગૃધ્રવચનં રામઃ સસ્નેહમબ્રવીત્ ॥ ૬॥

સાધુ ગૃધ્ર મહારાજ તથૈવ કુરુ મે પ્રિયમ્ ।
અત્રૈવ મે સમીપસ્થો નાતિદૂરે વને વસન્ ॥ ૭॥

ઇત્યામન્ત્રિતમાલિઙ્ગ્ય યયૌ પઞ્ચવટીં પ્રભુઃ ।
લક્ષ્મણેન સહ ભ્રાત્રા સીતયા રઘુનન્દનઃ ॥ ૮॥

ગત્વા તે ગૌતમીતીરં પઞ્ચવટ્યાં સુવિસ્તરમ્ ।

મન્દિરં કારયામાસ લક્ષ્મણેન સુબુદ્ધિના ॥ ૯॥

તત્ર તે ન્યવસન્ સર્વે ગઙ્ગાયા ઉત્તરે તટે ।
કદમ્બપનસામ્રાદિફલવૃક્ષસમાકુલે ॥ ૧૦॥

વિવિક્તે જનસમ્બાધવર્જિતે નીરુજસ્થલે ।
વિનોદયન્ જનકજાં લક્ષ્મણેન વિપશ્ચિતા ॥ ૧૧॥

અધ્યુવાસ સુખં રામો દેવલોક ઇવાપરઃ ।
કન્દમૂલફલાદીનિ લક્ષ્મણોઽનુદિનં તયોઃ ॥ ૧૨॥

આનીય પ્રદદૌ રામસેવાતત્પરમાનસઃ ।
ધનુર્બાણધરો નિત્યં રાત્રૌ જાગર્તિ સર્વતઃ ॥ ૧૩॥

સ્નાનં કુર્વન્ત્યનુદિનં ત્રયસ્તે ગૌતમીજલે ।
ઉભયોર્મધ્યગા સીતા કુરુતે ચ ગમાગમૌ ॥ ૧૪॥

આનીય સલિલં નિત્યં લક્ષ્મણઃ પ્રીતમાનસઃ ।
સેવતેઽહરહઃ પ્રીત્યા એવમાસન્ સુખં ત્રયઃ ॥ ૧૫॥

એકદા લક્ષ્મણો રામમેકાન્તે સમુપસ્થિતમ્ ।
વિનયાવનતો ભૂત્વા પપ્રચ્છ પરમેશ્વરમ્ ॥ ૧૬॥

ભગવન્ શ્રોતુમિચ્છામિ મોક્ષસ્યૈકાન્તિકીં ગતિમ્ ।
ત્વત્તઃ કમલપત્રાક્ષ સઙ્ક્ષેપાદ્વક્તુમર્હસિ ॥ ૧૭॥

જ્ઞાનં વિજ્ઞાનસહિતં ભક્તિવૈરાગ્યબૃંહિતમ્ ।
આચક્ષ્વ મે રઘુશ્રેષ્ઠ વક્તા નાન્યોઽસ્તિ ભૂતલે ॥ ૧૮॥

શ્રીરામ ઉવાચ

શ ૃણુ વક્ષ્યામિ તે વત્સ ગુહ્યાદ્ગુહ્યતરં પરમ્ ।
યદ્વિજ્ઞાય નરો જહ્યાત્સદ્યો વૈકલ્પકં ભ્રમમ્ ॥ ૧૯॥

આદૌ માયાસ્વરૂપં તે વક્ષ્યામિ તદનન્તરમ્ ।
જ્ઞાનસ્ય સાધનં પશ્ચાજ્જ્ઞાનવિજ્ઞાનસંયુતમ્ ॥ ૨૦॥

જ્ઞેયં ચ પરમાત્માનં યજ્જ્ઞાત્વા મુચ્યતે ભયાત્ ।
અનાત્મનિ શરીરાદાવાત્મબુદ્ધિસ્તુ યા ભવેત્ ॥ ૨૧॥

સૈવ માયા તયૈવાસૌ સંસારઃ પરિકલ્પ્યતે ।
રૂપે દ્વે નિશ્ચિતે પૂર્વે માયાયાઃ કુલનન્દન ॥ ૨૨॥

વિક્ષેપાવરણે તત્ર પ્રથમં કલ્પયેજ્જગત્ ।
લિઙ્ગાદ્યબ્રહ્મપર્યન્તં સ્થૂલસૂક્ષ્મવિભેદતઃ ॥ ૨૩॥

અપરં ત્વખિલં જ્ઞાનરૂપમાવૃત્ય તિષ્ઠતિ ।
માયયા કલ્પિતં વિશ્વં પરમાત્મનિ કેવલે ॥ ૨૪॥

રજ્જૌ ભુજઙ્ગવદ્ભ્રાન્ત્યા વિચારે નાસ્તિ કિઞ્ચન ।
શ્રૂયતે દૃશ્યતે યદ્યત્સ્મર્યતે વા નરૈઃ સદા ॥ ૨૫॥

અસદેવ હિ તત્સર્વં યથા સ્વપ્નમનોરથૌ ।
દેહ એવ હિ સંસારવૃક્ષમૂલં દૃઢં સ્મૃતમ્ ॥ ૨૬॥

તન્મૂલઃ પુત્રદારાદિબન્ધઃ કિં તેઽન્યથાત્મનઃ ॥ ૨૭॥

દેહસ્તુ સ્થૂલભૂતાનાં પઞ્ચ તન્માત્રપઞ્ચકમ્ ।
અહઙ્કારશ્ચ બુદ્ધિશ્ચ ઇન્દ્રિયાણિ તથા દશ ॥ ૨૮॥

ચિદાભાસો મનશ્ચૈવ મૂલપ્રકૃતિરેવ ચ ।
એતત્ક્ષેત્રમિતિ જ્ઞેયં દેહ ઇત્યભિધીયતે ॥ ૨૯॥

એતૈર્વિલક્ષણો જીવઃ પરમાત્મા નિરામયઃ ।
તસ્ય જીવસ્ય વિજ્ઞાને સાધનાન્યપિ મે શ ૃણુ ॥ ૩૦॥

જીવશ્ચ પરમાત્મા ચ પર્યાયો નાત્ર ભેદધીઃ ।
માનાભાવસ્તથા દમ્ભહિંસાદિપરિવર્જનમ્ ॥ ૩૧॥

પરાક્ષેપાદિસહનં સર્વત્રાવક્રતા તથા ।
મનોવાક્કાયસદ્ભક્ત્યા સદ્ગુરોઃ પરિસેવનમ્ ॥ ૩૨॥

બાહ્યાભ્યન્તરસંશુદ્ધિઃ સ્થિરતા સત્ક્રિયાદિષુ ।
મનોવાક્કાયદણ્ડશ્ચ વિષયેષુ નિરીહતા ॥ ૩૩॥

નિરહઙ્કારતા જન્મજરાદ્યાલોચનં તથા ।
અસક્તિઃ સ્નેહશૂન્યત્વં પુત્રદારધનાદિષુ ॥ ૩૪॥

ઇષ્ટાનિષ્ટાગમે નિત્યં ચિત્તસ્ય સમતા તથા ।
મયિ સર્વાત્મકે રામે હ્યનન્યવિષયા મતિઃ ॥ ૩૫॥

જનસમ્બાધરહિતશુદ્ધદેશનિષેવણમ્ ।
પ્રાકૃતૈર્જનસઙ્ઘૈશ્ચ હ્યરતિઃ સર્વદા ભવેત્ ॥ ૩૬॥

આત્મજ્ઞાને સદોદ્યોગો વેદાન્તાર્થાવલોકનમ્ ।
ઉક્તૈરેતૈર્ભવેજ્જ્ઞાનં વિપરીતૈર્વિપર્યયઃ ॥ ૩૭॥

બુદ્ધિપ્રાણમનોદેહાહઙ્કૃતિભ્યો વિલક્ષણઃ ।
ચિદાત્માહં નિત્યશુદ્ધો બુદ્ધ એવેતિ નિશ્ચયમ્ ॥ ૩૮॥

યેન જ્ઞાનેન સંવિત્તે તજ્જ્ઞાનં નિશ્ચિતં ચ મે ।
વિજ્ઞાનં ચ તદૈવૈતત્સાક્ષાદનુભવેદ્યદા ॥ ૩૯॥

આત્મા સર્વત્ર પૂર્ણઃ સ્યાચ્ચિદાનન્દાત્મકોઽવ્યયઃ ।
બુદ્ધ્યાદ્યુપાધિરહિતઃ પરિણામાદિવર્જિતઃ ॥ ૪૦॥

સ્વપ્રકાશેન દેહાદીન્ ભાસયન્નનપાવૃતઃ ।
એક એવાદ્વિતીયશ્ચ સત્યજ્ઞાનાદિલક્ષણઃ ॥ ૪૧॥

અસઙ્ગઃ સ્વપ્રભો દ્રષ્ટા વિજ્ઞાનેનાવગમ્યતે ।
આચાર્યશાસ્ત્રોપદેશાદૈક્યજ્ઞાનં યદા ભવેત્ ॥ ૪૨॥

આત્મનોર્જીવપરયોર્મૂલાવિદ્યા તદૈવ હિ ।
લીયતે કાર્યકરણૈઃ સહૈવ પરમાત્મનિ ॥ ૪૩॥

સાવસ્થા મુક્તિરિત્યુક્તા હ્યુપચારોઽયમાત્મનિ ।
ઇદં મોક્ષસ્વરૂપં તે કથિતં રઘુનન્દન ॥ ૪૪॥

જ્ઞાનવિજ્ઞાનવૈરાગ્યસહિતં મે પરાત્મનઃ ।
કિન્ત્વેતદ્દુર્લભં મન્યે મદ્ભક્તિવિમુખાત્મનામ્ ॥ ૪૫॥

ચક્ષુષ્મતામપિ તથા રાત્રૌ સમ્યઙ્ ન દૃશ્યતે ।
પદં દીપસમેતાનાં દૃશ્યતે સમ્યગેવ હિ ॥ ૪૬॥

એવં મદ્ભક્તિયુક્તાનામાત્મા સમ્યક્ પ્રકાશતે ।
મદ્ભક્તેઃ કારણં કિઞ્ચિદ્વક્ષ્યામિ શ‍ૃણુ તત્ત્વતઃ ॥ ૪૭॥

મદ્ભક્તસઙ્ગો મત્સેવા મદ્ભક્તાનાં નિરન્તરમ્ ।
એકાદશ્યુપવાસાદિ મમ પર્વાનુમોદનમ્ ॥ ૪૮॥

મત્કથાશ્રવણે પાઠે વ્યાખ્યાને સર્વદા રતિઃ ।
મત્પૂજાપરિનિષ્ઠા ચ મમ નામાનુકીર્તનમ્ ॥ ૪૯॥

એવં સતતયુક્તાનાં ભક્તિરવ્યભિચારિણી ।

મયિ સઞ્જાયતે નિત્યં તતઃ કિમવશિષ્યતે ॥ ૫૦॥

અતો મદ્ભક્તિયુક્તસ્ય જ્ઞાનં વિજ્ઞાનમેવ ચ ।
વૈરાગ્યં ચ ભવેચ્છીઘ્રં તતો મુક્તિમવાપ્નુયાત્ ॥ ૫૧॥

કથિતં સર્વમેતત્તે તવ પ્રશ્નાનુસારતઃ ।
અસ્મિન્મનઃ સમાધાય યસ્તિષ્ઠેત્સ તુ મુક્તિભાક્ ॥ ૫૨॥

ન વક્તવ્યમિદં યત્નાન્મદ્ભક્તિવિમુખાય હિ ।
મદ્ભક્તાય પ્રદાતવ્યમાહૂયાપિ પ્રયત્નતઃ ॥ ૫૩॥

ય ઇદં તુ પઠેન્નિત્યં શ્રદ્ધાભક્તિસમન્વિતઃ ।
અજ્ઞાનપટલધ્વાન્તં વિધૂય પરિમુચ્યતે ॥ ૫૪॥

ભક્તાનાં મમ યોગિનાં સુવિમલસ્વાન્તાતિશાન્તાત્મનાં
મત્સેવાભિરતાત્મનાં ચ વિમલજ્ઞાનાત્મનાં સર્વદા ।
સઙ્ગં યઃ કુરુતે સદોદ્યતમતિસ્તત્સેવનાનન્યધીઃ
મોક્ષસ્તસ્ય કરે સ્થિતોઽહમનિશં દૃશ્યો ભવે નાન્યથા ॥ ૫૫॥

ઇતિ શ્રીમદધ્યાત્મરામયણે ઉમામહેશ્વરસંવાદે
અરણ્યકાણ્ડે ચતુર્થઃ સર્ગઃ ॥ ૪॥

## ॥ પઞ્ચમઃ સર્ગઃ ॥

શ્રી મહાદેવ ઉવાચ
તસ્મિન્ કાલે મહારણ્યે રાક્ષસી કામરૂપિણી ।
વિચચાર મહાસત્ત્વા જનસ્થાનનિવાસિની ॥ ૧॥

એકદા ગૌતમીતીરે પઞ્ચવટ્યાં સમીપતઃ ।
પદ્મવજ્રાઙ્કુશાઙ્કાનિ પદાનિ જગતીપતેઃ ॥ ૨॥

દૃષ્ટ્વા કામપરીતાત્મા પાદસૌન્દર્યમોહિતા ।
પશ્યન્તી સા શનૈરાયાદ્રાઘવસ્ય નિવેશનમ્ ॥ ૩॥

તત્ર સા તં રમાનાથં સીતયા સહ સંસ્થિતમ્ ।
કન્દર્પસદૃશં રામં દૃષ્ટ્વા કામવિમોહિતા ॥ ૪॥

રાક્ષસી રાઘવં પ્રાહ કસ્ય ત્વં કઃ કિમાશ્રમે ।

યુક્તો જટાવલ્કલાદ્યૈઃ સાધ્યં કિં તેઽત્ર મે વદ ॥ ૫॥

અહં શૂર્પણખા નામ રાક્ષસી કામરૂપિણી ।
ભગિની રાક્ષસેન્દ્રસ્ય રાવણસ્ય મહાત્મનઃ ॥ ૬॥

ખરેણ સહિતા ભ્રાત્રા વસામ્યત્રૈવ કાનને ।
રાજ્ઞા દત્તં ચ મે સર્વં મુનિભક્ષા વસામ્યહમ્ ॥ ૭॥

ત્વાં તુ વેદિતુમિચ્છામિ વદ મે વદતાં વર ।
તામાહ રામનામાહમયોધ્યાધિપતેઃ સુતઃ ॥ ૮॥

એષા મે સુન્દરી ભાર્યા સીતા જનકનન્દિની ।
સ તુ ભ્રાતા કનીયાન્ મે લક્ષ્મણોઽતીવસુન્દરઃ ॥ ૯॥

કિં કૃત્યં તે મયા બ્રૂહિ કાર્યં ભુવનસુન્દરિ ।
ઇતિ રામવચઃ શ્રુત્વા કામાર્તા સાબ્રવીદિદમ્ ॥ ૧૦॥

એહિ રામ મયા સાર્ધં રમસ્વ ગિરિકાનને ।
કામાર્તાહં ન શક્નોમિ ત્યક્તું ત્વાં કમલેક્ષણમ્ ॥ ૧૧॥

રામઃ સીતાં કટાક્ષેણ પશ્યન્ સસ્મિતમબ્રવીત્ ।
ભાર્યા મમૈષા કલ્યાણી વિદ્યતે હ્યનપાયિની ॥ ૧૨॥

ત્વં તુ સાપત્ન્યદુઃખેન કથં સ્થાસ્યસિ સુન્દરિ ।
બહિરાસ્તે મમ ભ્રાતા લક્ષ્મણોઽતીવ સુન્દરઃ ॥ ૧૩॥

તવાનુરૂપો ભવિતા પતિસ્તેનૈવ સઞ્ચર ।
ઇત્યુક્તા લક્ષ્મણં પ્રાહ પતિર્મે ભવ સુન્દર ॥ ૧૪॥

ભ્રાતુરાજ્ઞાં પુરસ્કૃત્ય સઙ્ગચ્છાવોઽદ્ય મા ચિરમ્ ।
ઇત્યાહ રાક્ષસી ઘોરા લક્ષ્મણં કામમોહિતા ॥ ૧૫॥

તામાહ લક્ષ્મણઃ સાધ્વિ દાસોઽહં તસ્ય ધીમતઃ ।
દાસી ભવિષ્યસિ ત્વં તુ તતો દુઃખતરં નુ કિમ્ ॥ ૧૬॥

તમેવ ગચ્છ ભદ્રં તે સ તુ રાજાખિલેશ્વરઃ ।
તચ્છ્રુત્વા પુનરપ્યાગાદ્રાઘવં દુષ્ટમાનસા ॥ ૧૭॥

ક્રોધાદ્રામ કિમર્થં માં ભ્રામયસ્યનવસ્થિતઃ ।
ઇદાનીમેવ તાં સીતાં ભક્ષયામિ તવાગ્રતઃ ॥ ૧૮॥

ઇત્યુક્ત્વા વિકટાકારા જાનકીમનુધાવતિ ।
તતો રામાજ્ઞયા ખડ્ગમાદાય પરિગૃહ્ય તામ્ ॥ ૧૯॥

ચિચ્છેદ નાસાં કર્ણૌ ચ લક્ષ્મણો લઘુવિક્રમઃ ।
તતો ઘોરધ્વનિં કૃત્વા રુધિરાક્તવપુર્દ્રુતમ્ ॥ ૨૦॥

ક્રન્દમાના પપાતાગ્રે ખરસ્ય પરુષાક્ષરા ।
કિમેતદિતિ તામાહ ખરઃ ખરતરાક્ષરઃ ॥ ૨૧॥

કેનૈવં કારિતાસિ ત્વં મૃત્યોર્વક્ત્રાનુવર્તિના ।
વદ મે તં વધિષ્યામિ કાલકલ્પમપિ ક્ષણાત્ ॥ ૨૨॥

તમાહ રાક્ષસી રામઃ સીતાલક્ષ્મણસંયુતઃ ।
દણ્ડકં નિર્ભયં કુર્વન્નાસ્તે ગોદાવરીતટે ॥ ૨૩॥

મામેવં કૃતવાન્સ્તસ્ય ભ્રાતા તેનૈવ ચોદિતઃ ।
યદિ ત્વં કુલજાતોઽસિ વીરોઽસિ જહિ તૌ રિપૂ ॥ ૨૪॥

તયોસ્તુ રુધિરં પાસ્યે ભક્ષયૈતૌ સુદુર્મદૌ ।
નો ચેત્પ્રાણાન્ પરિત્યજ્ય યાસ્યામિ યમસાદનમ્ ॥ ૨૫॥

તચ્છ્રુત્વા ત્વરિતં પ્રાગાત્ખરઃ ક્રોધેન મૂર્ચ્છિતઃ ।
ચતુર્દશ સહસ્રાણિ રક્ષસાં ભીમકર્મણામ્ ॥ ૨૬॥

ચોદયામાસ રામસ્ય સમીપં વધકાઙ્ક્ષયા ।
ખરશ્ચ ત્રિશિરાશ્ચૈવ દૂષણશ્ચૈવ રાક્ષસઃ ॥ ૨૭॥

સર્વે રામં યયુઃ શીઘ્રં નાનાપ્રહરણોદ્યતાઃ ।
શ્રુત્વા કોલાહલં તેષાં રામઃ સૌમિત્રિમબ્રવીત્ ॥ ૨૮॥

શ્રૂયતે વિપુલઃ શબ્દો નૂનમાયાન્તિ રાક્ષસાઃ ।
ભવિષ્યતિ મહદ્યુદ્ધં નૂનમદ્ય મયા સહ ॥ ૨૯॥

સીતાં નીત્વા ગુહાં ગત્વા તત્ર તિષ્ઠ મહાબલ ।
હન્તુમિચ્છામ્યહં સર્વાન્ રાક્ષસાન્ ઘોરરૂપિણઃ ॥ ૩૦॥

અત્ર કિઞ્ચિન્ન વક્તવ્યં શાપિતોઽસિ મમોપરિ ।
તથેતિ સીતામાદાય લક્ષ્મણો ગહ્વરં યયૌ ॥ ૩૧॥

રામઃ પરિકરં બદ્ધ્વા ધનુરાદાય નિષ્ઠુરમ્ ।
તૂણીરાવક્ષયશરૌ બદ્ધ્વાયત્તોઽભવત્પ્રભુઃ ॥ ૩૨॥

તત આગત્ય રક્ષાંસિ રામસ્યોપરિ ચિક્ષિપુઃ ।
આયુધાનિ વિચિત્રાણિ પાષાણાન્ પાદપાનપિ ॥ ૩૩॥

તાનિ ચિચ્છેદ રામોઽપિ લીલયા તિલશઃ ક્ષણાત્ ।
તતો બાણસહસ્રેણ હત્વા તાન્ સર્વરાક્ષસાન્ ॥ ૩૪॥

ખરં ત્રિશિરસં ચૈવ દૂષણં ચૈવ રાક્ષસમ્ ।
જઘાન પ્રહરાર્ધેન સર્વાનેવ રઘૂત્તમઃ ॥ ૩૫॥

લક્ષ્મણોઽપિ ગુહામધ્યાત્સીતામાદાય રાઘવે ।
સમર્પ્ય રાક્ષસાન્ દૃષ્ટ્વા હતાન્ વિસ્મયમાયયૌ ॥ ૩૬॥

સીતા રામં સમાલિઙ્ગ્ય પ્રસન્નમુખપઙ્કજા ।
શસ્ત્રવ્રણાનિ ચાઙ્ગેષુ મમાર્જ જનકાત્મજા ॥ ૩૭॥

સાપિ દુદ્રાવ દૃષ્ટ્વા તાન્ હતાન્ રાક્ષસપુઙ્ગવાન્ ।
લઙ્કાં ગત્વા સભામધ્યે ક્રોશન્તી પાદસન્નિધૌ ॥ ૩૮॥

રાવણસ્ય પપાતોર્વ્યાં ભગિની તસ્ય રક્ષસઃ ।
દૃષ્ટ્વા તાં રાવણઃ પ્રાહ ભગિનીં ભયવિહ્વલામ્ ॥ ૩૯॥

ઉત્તિષ્ઠોત્તિષ્ઠ વત્સે ત્વં વિરૂપકરણં તવ ।
કૃતં શક્રેણ વા ભદ્રે યમેન વરુણેન વા ॥ ૪૦॥

કુબેરેણાથવા બ્રૂહિ ભસ્મીકુર્યાં ક્ષણેન તમ્ ।
રાક્ષસી તમુવાચેદં ત્વં પ્રમત્તો વિમૂઢધીઃ ॥ ૪૧॥

પાનાસક્તઃ સ્ત્રીવિજિતઃ ષણ્ઢઃ સર્વત્ર લક્ષ્યસે ।
ચારચક્ષુર્વિહીનસ્ત્વં કથં રાજા ભવિષ્યસિ ॥ ૪૨॥

ખરશ્ચ નિહતઃ સઙ્ખ્યે દૂષણસ્ત્રિશિરાસ્તથા ।
ચતુર્દશ સહસ્રાણિ રાક્ષસાનાં મહાત્મનામ્ ॥ ૪૩॥

નિહતાનિ ક્ષણેનૈવ રામેણાસુરશત્રુણા ।
જનસ્થાનમશેષેણ મુનીનાં નિર્ભયં કૃતમ્ ।
ન જાનાસિ વિમૂઢસ્ત્વમત એવ મયોચ્યતે ॥ ૪૪॥

રાવણ ઉવાચ

કો વા રામઃ કિમર્થં વા કથં તેનાસુરા હતાઃ ।

સમ્યક્કથય મે તેષાં મૂલઘાતં કરોમ્યહમ્ ॥ ૪૫॥

શૂર્પણખોવાચ

જનસ્થાનાદહં યાતા કદાચિત્ ગૌતમીતટે ।
તત્ર પઞ્ચવટી નામ પુરા મુનિજનાશ્રયા ॥ ૪૬॥

તત્રાશ્રમે મયા દૃષ્ટો રામો રાજીવલોચનઃ ।
ધનુર્બાણધરઃ શ્રીમાન્ જટાવલ્કલમણ્ડિતઃ ॥ ૪૭॥

કનીયાનનુજસ્તસ્ય લક્ષ્મણોઽપિ તથાવિધઃ ।
તસ્ય ભાર્યા વિશાલાક્ષી રૂપિણી શ્રીરિવાપરા ॥ ૪૮॥

દેવગન્ધર્વનાગાનાં મનુષ્યાણાં તથાવિધા ।
ન દૃષ્ટા ન શ્રુતા રાજન્ દ્યોતયન્તી વનં શુભા ॥ ૪૯॥

આનેતુમહમુદ્યુક્તા તાં ભાર્યાર્થં તવાનઘ ।
લક્ષ્મણો નામ તદ્ભ્રાતા ચિચ્છેદ મમ નાસિકામ્ ॥ ૫૦॥

કર્ણૌ ચ નોદિતસ્તેન રામેણ સ મહાબલઃ ।
તતોઽહમતિદુઃખેન રુદતી ખરમન્વગામ્ ॥ ૫૧॥

સોઽપિ રામં સમાસાદ્ય યુદ્ધં રાક્ષસયૂથપૈઃ ।
અતઃ ક્ષણેન રામેણ તેનૈવ બલશાલિના ॥ ૫૨॥

સર્વે તેન વિનષ્ટા વૈ રાક્ષસા ભીમવિક્રમાઃ ।
યદિ રામો મનઃ કુર્યાત્ત્રૈલોક્યં નિમિષાર્ધતઃ ॥ ૫૩॥

ભસ્મીકુર્યાન્ન સન્દેહ ઇતિ ભાતિ મમ પ્રભો ।
યદિ સા તવ ભાર્યા સ્યાત્સફલં તવ જીવિતમ્ ॥ ૫૪॥

અતો યતસ્વ રાજેન્દ્ર યથા તે વલ્લભા ભવેત્ ।
સીતા રાજીવપત્રાક્ષી સર્વલોકૈકસુન્દરી ॥ ૫૫॥

સાક્ષાદ્રામસ્ય પુરતઃ સ્થાતું ત્વં ન ક્ષમઃ પ્રભો ।
માયયા મોહયિત્વા તુ પ્રાપ્સ્યસે તાં રઘૂત્તમમ્ ॥ ૫૬॥

શ્રુત્વા તત્સૂક્તવાક્યૈશ્ચ દાનમાનાદિભિસ્તથા ।
આશ્વાસ્ય ભગિનીં રાજા પ્રવિવેશ સ્વકં ગૃહમ્ ।
તત્ર ચિન્તાપરો ભૂત્વા નિદ્રાં રાત્રૌ ન લબ્ધવાન્ ॥ ૫૭॥

એકેન રામેણ કથં મનુષ્યમાત્રેણ

નષ્ટઃ સબલઃ ખરો મે ।
ભ્રાતા કથં મે બલવીર્યદર્પ-
યુતો વિનષ્ટો બત રાઘવેણ ॥ ૫૮॥

યદ્વા ન રામો મનુજઃ પરેશો
માં હન્તુકામઃ સબલં બલૌઘૈઃ ।
સમ્પ્રાર્થિતોઽયં દ્રુહિણેન પૂર્વં
મનુષ્યરૂપોઽદ્ય રઘોઃ કુલેઽભૂત્ ॥ ૫૯॥

વધ્યો યદિ સ્યાં પરમાત્મનાહં
વૈકુણ્ઠરાજ્યં પરિપાલયેઽહમ્ ।
નો ચેદિદં રાક્ષસરાજ્યમેવ
ભોક્ષ્યે ચિરં રામમતો વ્રજામિ ॥ ૬૦॥

ઇત્થં વિચિન્ત્યાખિલરાક્ષસેન્દ્રો
રામં વિદિત્વા પરમેશ્વરં હરિમ્ ।
વિરોધબુદ્ધ્યૈવ હરિં પ્રયામિ
દ્રુતં ન ભક્ત્યા ભગવાન્ પ્રસીદેત્ ॥ ૬૧॥

ઇતિ શ્રીમદધ્યાત્મરામયણે ઉમામહેશ્વરસંવાદે
અરણ્યકાણ્ડે પઞ્ચમઃ સર્ગઃ ॥ ૫॥

## ॥ ષષ્ઠઃ સર્ગઃ ॥

વિચિન્ત્યૈવં નિશાયાં સ પ્રભાતે રથમાસ્થિતઃ ।
રાવણો મનસા કાર્યમેકં નિશ્ચિત્ય બુદ્ધિમાન્ ॥ ૧॥

યયૌ મારીચસદનં પરં પારમુદન્વતઃ ।
મારીચસ્તત્ર મુનિવજ્જટાવલ્કલધારકઃ ॥ ૨॥

ધ્યાયન્ હૃદિ પરાત્માનં નિર્ગુણં ગુણભાસકમ્ ।
સમાધિવિરમેઽપશ્યદ્રાવણં ગૃહમાગતમ્ ॥ ૩॥

દ્રુતમુત્થાય ચાલિઙ્ગ્ય પૂજયિત્વા યથાવિધિ ।
કૃતાતિથ્યં સુખાસીનં મારીચો વાક્યમબ્રવીત્ ॥ ૪॥

સમાગમનમેતત્તે રથેનૈકેન રાવણ ।
ચિન્તાપર ઇવાભાસિ હૃદિ કાર્યં વિચિન્તયન્ ॥ ૫॥

બ્રૂહિ મે ન હિ ગોપ્યં ચેત્કરવાણિ તવ પ્રિયમ્ ।
ન્યાય્યં ચેદ્બ્રૂહિ રાજેન્દ્ર વૃજિનં માં સ્પૃશેન્ન હિ ॥ ૬॥

રાવણ ઉવાચ
અસ્તિ રાજા દશરથઃ સાકેતાધિપતિઃ કિલ ।
રામનામા સુતસ્તસ્ય જ્યેષ્ઠઃ સત્યપરાક્રમઃ ॥ ૭॥

વિવાસયામાસ સુતં વનં વનજનપ્રિયમ્ ।
ભાર્યયા સહિતં ભ્રાત્રા લક્ષ્મણેન સમન્વિતમ્ ॥ ૮॥

સ આસ્તે વિપિને ઘોરે પઞ્ચવટ્યાશ્રમે શુભે ।
તસ્ય ભાર્યા વિશાલાક્ષી સીતા લોકવિમોહિની ॥ ૯॥

રામો નિરપરાધાન્મે રાક્ષસાન્ ભીમવિક્રમાન્ ।
ખરં ચ હત્વા વિપિને સુખમાસ્તેઽતિનિર્ભયઃ ॥ ૧૦॥

ભગિન્યાઃ શૂર્પણખાયા નિર્દોષાયાશ્ચ નાસિકામ્ ।
કર્ણૌ ચિચ્છેદ દુષ્ટાત્મા વને તિષ્ઠતિ નિર્ભયઃ ॥ ૧૧॥

અતસ્ત્વયા સહાયેન ગત્વા તત્પ્રાણવલ્લભામ્ ।
આનયિષ્યામિ વિપિને રહિતે રાઘવેણ તામ્ ॥ ૧૨॥

ત્વં તુ માયામૃગો ભૂત્વા હ્યાશ્રમાદપનેષ્યસિ ।
રામં ચ લક્ષ્મણં ચૈવ તદા સીતાં હરામ્યહમ્ ॥ ૧૩॥

ત્વં તુ તાવત્સહાયં મે કૃત્વા સ્થાસ્યસિ પૂર્વવત્ ।
ઇત્યેવં ભાષમાણં તં રાવણં વીક્ષ્ય વિસ્મિતઃ ॥ ૧૪॥

કેનેદમુપદિષ્ટં તે મૂલઘાતકરં વચઃ ।
સ એવ શત્રુર્વધ્યશ્ચ યસ્ત્વન્નાશં પ્રતીક્ષતે ॥ ૧૫॥

રામસ્ય પૌરુષં સ્મૃત્વા ચિત્તમદ્યાપિ રાવણ ।
બાલોઽપિ માં કૌશિકસ્ય યજ્ઞસંરક્ષણાય સઃ ॥ ૧૬॥

આગતસ્ત્વિષુણૈકેન પાતયામાસ સાગરે ।
યોજનાનાં શતં રામસ્તદાદિ ભયવિહ્વલઃ ॥ ૧૭॥

સ્મૃત્વા સ્મૃત્વા તદેવાહં રામં પશ્યામિ સર્વતઃ ॥ ૧૮॥

દણ્ડકેઽપિ પુનરપ્યહં વને
　　પૂર્વવૈરમનુચિન્તયન્ હૃદિ ।
તીક્ષ્ણશૃઙ્ગમૃગરૂપમેકદા
　　માદૃશૈર્બહુભિરાવૃતોઽભ્યયામ્ ॥ ૧૯॥

રાઘવં જનકજાસમન્વિતં
　　લક્ષ્મણેન સહિતં ત્વરાન્વિતઃ ।
આગતોઽહમથ હન્તુમુદ્યતો
　　માં વિલોક્ય શરમેકમક્ષિપત્ ॥ ૨૦॥

તેન વિદ્ધહૃદયોઽહમુદ્ભ્રમન્
　　રાક્ષસેન્દ્ર પતિતોઽસ્મિ સાગરે ।
તત્પ્રભૃત્યહમિદં સમાશ્રિતઃ
　　સ્થાનમૂર્જિતમિદં ભયાર્દિતઃ ॥ ૨૧॥

રામમેવ સતતં વિભાવયે
　　ભીતભીત ઇવ ભોગરાશિતઃ ।
રાજરત્નરમણીરથાદિકં
　　શ્રોત્રયોર્યદિ ગતં ભયં ભવેત્ ॥ ૨૨॥

રામ આગત ઇહેતિશઙ્કયા
　　બાહ્યકાર્યમપિ સર્વમત્યજમ્ ।
નિદ્રયા પરિવૃતો યદા સ્વપે
　　રામમેવ મનસાનુચિન્તયન્ ॥ ૨૩॥

સ્વપ્નદૃષ્ટિગતરાઘવં તદા
　　બોધિતો વિગતનિદ્ર આસ્થિતઃ ।
તદ્ભવાનપિ વિમુચ્ય ચાગ્રહં
　　રાઘવં પ્રતિ ગૃહં પ્રયાહિ ભોઃ ॥ ૨૪॥

રક્ષ રાક્ષસકુલં ચિરાગતં
　　તત્સ્મૃતૌ સકલમેવ નશ્યતિ ।
તવ હિતં વદતો મમ ભાષિતં
　　પરિગૃહાણ પરાત્મનિ રાઘવે ।
ત્યજ વિરોધમતિં ભજ ભક્તિતઃ

પરમકારુણિકો રઘુનન્દનઃ ॥ ૨૫॥

અહમશેષમિદં મુનિવાક્યતઃ
અશ‍ૃણવમાદિયુગે પરમેશ્વરઃ ।
બ્રહ્મણાર્થિત ઉવાચ તં હરિઃ
કિં તવેપ્સિતમહં કરવાણિ તત્ ॥ ૨૬॥

બ્રહ્મણોક્તમરવિન્દલોચન
ત્વં પ્રયાહિ ભુવિ માનુષં વપુઃ ।
દશરથાત્મજભાવમઞ્જસા
જહિ રિપું દશકન્ધરં હરે ॥ ૨૭॥

અતો ન માનુષો રામઃ સાક્ષાન્નારાયણોઽવ્યયઃ ।
માયામાનુષવેષેણ વનં યાતોઽતિનિર્ભયઃ ॥ ૨૮॥

ભૂભારહરણાર્થાય ગચ્છ તાત ગૃહં સુખમ્ ।
શ્રુત્વા મારીચવચનં રાવણઃ પ્રત્યભાષત ॥ ૨૯॥

પરમાત્મા યદા રામઃ પ્રાર્થિતો બ્રહ્મણા કિલ ।
માં હન્તું માનુષો ભૂત્વા યત્નાદિહ સમાગતઃ ॥ ૩૦॥

કરિષ્યત્યચિરાદેવ સત્યસઙ્કલ્પ ઈશ્વરઃ ।
અતોઽહં યત્નતઃ સીતામાનેષ્યામ્યેવ રાઘવાત્ ॥ ૩૧॥

વધે પ્રાપ્તે રણે વીર પ્રાપ્સ્યામિ પરમં પદમ્ ।
યદ્વા રામં રણે હત્વા સીતાં પ્રાપ્સ્યામિ નિર્ભયઃ ॥ ૩૨॥

તદુત્તિષ્ઠ મહાભાગ વિચિત્રમૃગરૂપધૃક્ ।
રામં સલક્ષ્મણં શીઘ્રમાશ્રમાદતિદૂરતઃ ॥ ૩૩॥

આક્રમ્ય ગચ્છ ત્વં શીઘ્રં સુખં તિષ્ઠ યથા પુરા ।
અતઃ પરં ચેદ્યત્કિઞ્ચિદ્ભાષસે મદ્વિભીષણમ્ ॥ ૩૪॥

હનિષ્યામ્યસિનાનેન ત્વામત્રૈવ ન સંશયઃ ।
મારીચસ્તદ્વચઃ શ્રુત્વા સ્વાત્મન્યેવાન્વચિન્તયત્ ॥ ૩૫॥

યદિ માં રાઘવો હન્યાત્તદા મુક્તો ભવાર્ણવાત્ ।
માં હન્યાદ્યદિ ચેદ્દુષ્ટસ્તદા મે નિરયો ધ્રુવમ્ ॥ ૩૬॥

ઇતિ નિશ્ચિત્ય મરણં રામાદુત્થાય વેગતઃ ।

અબ્રવીદ્રાવણં રાજન્ કરોમ્યાજ્ઞાં તવ પ્રભો ॥ ૩૭॥

ઇત્યુક્ત્વા રથમાસ્થાય ગતો રામાશ્રમં પ્રતિ ।
શુદ્ધજામ્બૂનદપ્રખ્યો મૃગોઽભૂદ્રૌપ્યબિન્દુકઃ ॥ ૩૮॥

રત્નશ‌ૃઙ્ગો મણિખુરો નીલરત્નવિલોચનઃ ।
વિદ્યુત્પ્રભો વિમુગ્ધાસ્યો વિચચાર વનાન્તરે ॥ ૩૯॥

રામાશ્રમપદસ્યાન્તે સીતાદૃષ્ટિપથે ચરન્ ॥ ૪૦॥

ક્ષણં ચ ધાવત્યવતિષ્ઠતે ક્ષણં
સમીપમાગત્ય પુનર્ભયાવૃતઃ ।
એવં સ માયામૃગવેષરૂપધૃક્
ચચાર સીતાં પરિમોહયન્ ખલઃ ॥ ૪૧॥

ઇતિ શ્રીમદધ્યાત્મરામયણે ઉમામહેશ્વરસંવાદે
અરણ્યકાણ્ડે ષષ્ઠઃ સર્ગઃ ॥ ૬॥

## ॥ સપ્તમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ
અથ રામોઽપિ તત્સર્વં જ્ઞાત્વા રાવણચેષ્ટિતમ્ ।
ઉવાચ સીતામેકાન્તે શ‌ૃણુ જાનકિ મે વચઃ ॥ ૧॥

રાવણો ભિક્ષુરૂપેણ આગમિષ્યતિ તેઽન્તિકમ્ ।
ત્વં તુ છાયાં ત્વદાકારાં સ્થાપયિત્વોટજે વિશ ॥ ૨॥

અગ્નાવદૃશ્યરૂપેણ વર્ષં તિષ્ઠ મમાજ્ઞયા ।
રાવણસ્ય વધાન્તે માં પૂર્વવત્પ્રાપ્સ્યસે શુભે ॥ ૩॥

શ્રુત્વા રામોદિતં વાક્યં સાપિ તત્ર તથાકરોત્ ।
માયાસીતાં બહિઃ સ્થાપ્ય સ્વયમન્તર્દધેઽનલે ॥ ૪॥

માયાસીતા તદાઽપશ્યન્મૃગં માયાવિનિર્મિતમ્ ।
હસન્તી રામમભ્યેત્ય પ્રોવાચ વિનયાન્વિતા ॥ ૫॥

પશ્ય રામ મૃગં ચિત્રં કાનકં રત્નભૂષિતમ્ ।
વિચિત્રબિન્દુભિર્યુક્તં ચરન્તમકુતોભયમ્ ।

બદ્ધ્વા દેહિ મમ ક્રીડામૃગો ભવતુ સુન્દરઃ ॥ ૬॥

તથેતિ ધનુરાદાય ગચ્છન્ લક્ષ્મણમબ્રવીત્ ।
રક્ષ ત્વમતિયત્નેન સીતાં મત્પ્રાણવલ્લભામ્ ॥ ૭॥

માયિનઃ સન્તિ વિપિને રાક્ષસા ઘોરદર્શનાઃ ।
અતોઽત્રાવહિતઃ સાધ્વીં રક્ષ સીતામનિન્દિતામ્ ॥ ૮॥

લક્ષ્મણો રામમાહેદં દેવાયં મૃગરૂપધૃક્ ।
મારીચોઽત્ર ન સન્દેહ એવમ્ભૂતો મૃગઃ કુતઃ ॥ ૯॥

શ્રીરામ ઉવાચ

યદિ મારીચ એવાયં તદા હન્મિ ન સંશયઃ ।
મૃગશ્ચેદાનયિષ્યામિ સીતાવિશ્રમહેતવે ॥ ૧૦॥

ગમિષ્યામિ મૃગં બદ્ધ્વા હ્યાનયિષ્યામિ સત્વરઃ ।
ત્વં પ્રયત્નેન સન્તિષ્ઠ સીતાસંરક્ષણોદ્યતઃ ॥ ૧૧॥

ઇત્યુક્ત્વા પ્રયયૌ રામો માયામૃગમનુદ્રુતઃ ।
માયા યદાશ્રયા લોકમોહિની જગદાકૃતિઃ ॥ ૧૨॥

નિર્વિકારશ્ચિદાત્માપિ પૂર્ણોઽપિ મૃગમન્વગાત્ ।
ભક્તાનુકમ્પી ભગવાનિતિ સત્યં વચો હરિઃ ॥ ૧૩॥

કર્તું સીતાપ્રિયાર્થાય જાનન્નપિ મૃગં યયૌ ।
અન્યથા પૂર્ણકામસ્ય રામસ્ય વિદિતાત્મનઃ ॥ ૧૪॥

મૃગેણ વા સ્ત્રિયા વાપિ કિં કાર્યં પરમાત્મનઃ ॥ ૧૫॥

કદાચિદ્ દૃશ્યતેઽભ્યાશે ક્ષણં ધાવતિ લીયતે ।
દૃશ્યતે ચ તતો દૂરાદેવં રામમપાહરત્ ।
તતો રામોઽપિ વિજ્ઞાય રાક્ષસોઽયમિતિ સ્ફુટમ્ ॥ ૧૬॥

વિવ્યાધ શરમાદાય રાક્ષસં મૃગરૂપિણમ્ ।
પપાત રુધિરાક્તાસ્યો મારીચઃ પૂર્વરૂપધૃક્ ॥ ૧૭॥

હા હતોઽસ્મિ મહાબાહો ત્રાહિ લક્ષ્મણ માં દ્રુતમ્ ।
ઇત્યુક્ત્વા રામવદ્વાચા પપાત રુધિરાશનઃ ॥ ૧૮॥

યન્નામાજ્ઞોઽપિ મરણે સ્મૃત્વા તત્સામ્યમાપ્નુયાત્ ।
કિમુતાગ્રે હરિં પશ્યન્સ્તેનૈવ નિહતોઽસુરઃ ॥ ૧૯॥

તદ્દેહાદુત્થિતં તેજઃ સર્વલોકસ્ય પશ્યતઃ ।
રામમેવાવિશદ્દેવા વિસ્મયં પરમં યયુઃ ॥ ૨૦॥

કિં કર્મ કૃત્વા કિં પ્રાપ્તઃ પાતકી મુનિહિંસકઃ ।
અથવા રાઘવસ્યાયં મહિમા નાત્ર સંશયઃ ॥ ૨૧॥

રામબાણેન સંવિદ્ધઃ પૂર્વં રામમનુસ્મરન્ ।
ભયાત્સર્વં પરિત્યજ્ય ગૃહવિત્તાદિકં ચ યત્ ॥ ૨૨॥

હૃદિ રામં સદા ધ્યાત્વા નિર્ધૂતાશેષકલ્મષઃ ।
અન્તે રામેણ નિહતઃ પશ્યન્ રામમવાપ સઃ ॥ ૨૩॥

દ્વિજો વા રાક્ષસો વાપિ પાપી વા ધાર્મિકોઽપિ વા ।
ત્યજન્ કલેવરં રામં સ્મૃત્વા યાતિ પરં પદમ્ ॥ ૨૪॥

ઇતિ તેઽન્યોન્યમાભાષ્ય તતો દેવા દિવં યયુઃ ॥ ૨૫॥

રામસ્તચ્ચિન્તયામાસ મ્રિયમાણોઽસુરાધમઃ ।
હા લક્ષ્મણેતિ મદ્વાક્યમનુકુર્વન્મમાર કિમ્ ।
શ્રુત્વા મદ્વાક્યસદૃશં વાક્યં સીતાપિ કિં ભવેત્ ॥ ૨૬॥

ઇતિ ચિન્તાપરીતાત્મા રામો દૂરાન્ન્યવર્તત ॥ ૨૭॥

સીતા તદ્ભાષિતં શ્રુત્વા મારીચસ્ય દુરાત્મનઃ ।
ભીતાતિદુઃખસંવિગ્ના લક્ષ્મણં ત્વિદમબ્રવીત્ ।
ગચ્છ લક્ષ્મણ વેગેન ભ્રાતા તેઽસુરપીડિતઃ ॥ ૨૮॥

હા લક્ષ્મણેતિ વચનં ભ્રાતુસ્તે ન શ‍ૃણોષિ કિમ્ ।
તામાહ લક્ષ્મણો દેવિ રામવાક્યં ન તદ્ભવેત્ ॥ ૨૯॥

યઃ કશ્ચિદ્રાક્ષસો દેવિ મ્રિયમાણોઽબ્રવીદ્વચઃ ।
રામસ્ત્રૈલોક્યમપિ યઃ ક્રુદ્ધો નાશયતિ ક્ષણાત્ ॥ ૩૦॥

સ કથં દીનવચનં ભાષતેઽમરપૂજિતઃ ।
ક્રુદ્ધા લક્ષ્મણમાલોક્ય સીતા બાષ્પવિલોચના ॥ ૩૧॥

પ્રાહ લક્ષ્મણ દુર્બુદ્ધે ભ્રાતુર્વ્યસનમિચ્છસિ ।
પ્રેષિતો ભરતેનૈવ રામનાશાભિકાઙ્ક્ષિણા ॥ ૩૨॥

માં નેતુમાગતોઽસિ ત્વં રામનાશ ઉપસ્થિતે ।

ન પ્રાપ્સ્યસે ત્વં મામદ્ય પશ્ય પ્રાણાન્સ્ત્યજામ્યહમ્ ॥ ૩૩॥

ન જાનાતીદૃશં રામસ્ત્વાં ભાર્યાહરણોદ્યતમ્ ।
રામાદન્યં ન સ્પૃશામિ ત્વાં વા ભરતમેવ વા ॥ ૩૪॥

ઇત્યુક્ત્વા વધ્યમાના સા સ્વબાહુભ્યાં રુરોદ હ ।
તચ્છ્રુત્વા લક્ષ્મણઃ કર્ણૌ પિધાયાતીવ દુઃખિતઃ ॥ ૩૫॥

મામેવં ભાષસે ચણ્ડિ ધિક્ ત્વાં નાશમુપૈષ્યસિ ।
ઇત્યુક્ત્વા વનદેવીભ્યઃ સમર્પ્ય જનકાત્મજામ્ ॥ ૩૬॥

યયૌ દુઃખાતિસંવિગ્નો રામમેવ શનૈઃ શનૈઃ ।
તતોઽન્તરં સમાલોક્ય રાવણો ભિક્ષુવેષધૃક્ ॥ ૩૭॥

સીતાસમીપમગમત્ સ્ફુરદ્દણ્ડકમણ્ડલુઃ ।
સીતા તમવલોક્યાશુ નત્વા સમ્પૂજ્ય ભક્તિતઃ ॥ ૩૮॥

કન્દમૂલફલાદીનિ દત્ત્વા સ્વાગતમબ્રવીત્ ।
મુને ભુઙ્ક્ષ્વ ફલાદીનિ વિશ્રમસ્વ યથાસુખમ્ ॥ ૩૯॥

ઇદાનીમેવ ભર્તા મે હ્યાગમિષ્યતિ તે પ્રિયમ્ ।
કરિષ્યતિ વિશેષેણ તિષ્ઠ ત્વં યદિ રોચતે ॥ ૪૦॥

ભિક્ષુરુવાચ
કા ત્વં કમલપત્રાક્ષિ કો વા ભર્તા તવાનઘે ।
કિમર્થમત્ર તે વાસો વને રાક્ષસસેવિતે ।
બ્રૂહિ ભદ્રે તતઃ સર્વં સ્વવૃત્તાન્તં નિવેદયે ॥ ૪૧॥

સીતોવાચ
અયોધ્યાધિપતિઃ શ્રીમાન્ રાજા દશરથો મહાન્ ।
તસ્ય જ્યેષ્ઠઃ સુતો રામઃ સર્વલક્ષણલક્ષિતઃ ॥ ૪૨॥

તસ્યાહં ધર્મતઃ પત્ની સીતા જનકનન્દિની ।
તસ્ય ભ્રાતા કનીયાન્શ્ચ લક્ષ્મણો ભ્રાતૃવત્સલઃ ॥ ૪૩॥

પિતુરાજ્ઞાં પુરસ્કૃત્ય દણ્ડકે વસ્તુમાગતઃ ।
ચતુર્દશ સમાસ્ત્વાં તુ જ્ઞાતુમિચ્છામિ મે વદ ॥ ૪૪॥

ભિક્ષુરુવાચ
પૌલસ્ત્યતનયોઽહં તુ રાવણો રાક્ષસાધિપઃ ।

ત્વત્કામપરિતપ્તોઽહં ત્વાં નેતું પુરમાગતઃ ॥ ૪૫॥

મુનિવેષેણ રામેણ કિં કરિષ્યસિ માં ભજ ।
ભુઙ્ક્ષ્વ ભોગાન્ મયા સાર્ધં ત્યજ દુઃખં વનોદ્ભવમ્ ॥ ૪૬॥

શ્રુત્વા તદ્વચનં સીતા ભીતા કિઞ્ચિદુવાચ તમ્ ।
યદ્યેવં ભાષસે માં ત્વં નાશમેષ્યસિ રાઘવાત્ ॥ ૪૭॥

આગમિષ્યતિ રામોઽપિ ક્ષણં તિષ્ઠ સહાનુજઃ ।
માં કો ધર્ષયિતું શક્તો હરેર્ભાર્યાં શશો યથા ॥ ૪૮॥

રામબાણૈર્વિભિન્નસ્ત્વં પતિષ્યસિ મહીતલે ॥ ૪૯॥

ઇતિ સીતાવચઃ શ્રુત્વા રાવણઃ ક્રોધમૂર્ચ્છિતઃ ।
સ્વરૂપં દર્શયામાસ મહાપર્વતસન્નિભમ્ ।
દશાસ્યં વિંશતિભુજં કાલમેઘસમદ્યુતિમ્ ॥ ૫૦॥

તદ્દૃષ્ટ્વા વનદેવ્યશ્ચ ભૂતાનિ ચ વિતત્રસુઃ ।
તતો વિદાર્ય ધરણીં નખૈરુદ્ધૃત્ય બાહુભિઃ ॥ ૫૧॥

તોલયિત્વા રથે ક્ષિપ્ત્વા યયૌ ક્ષિપ્રં વિહાયસા ।
હા રામ હા લક્ષ્મણેતિ રુદતી જનકાત્મજા ॥ ૫૨॥

ભયોદ્વિગ્નમના દીના પશ્યન્તી ભુવમેવ સા ।
શ્રુત્વા તત્ક્રન્દિતં દીનં સીતાયાઃ પક્ષિસત્તમઃ ॥ ૫૩॥

જટાયુરુત્થિતઃ શીઘ્રં નગાગ્રાત્તીક્ષ્ણતુણ્ડકઃ ।
તિષ્ઠ તિષ્ઠેતિ તં પ્રાહ કો ગચ્છતિ મમાગ્રતઃ ॥ ૫૪॥

મુષિત્વા લોકનાથસ્ય ભાર્યાં શૂન્યાદ્વનાલયાત્ ।
શુનકો મન્ત્રપૂતં ત્વં પુરોડાશમિવાધ્વરે ॥ ૫૫॥

ઇત્યુક્ત્વા તીક્ષ્ણતુણ્ડેન ચૂર્ણયામાસ તદ્રથમ્ ।
વાહાન્ બિભેદ પાદાભ્યાં ચૂર્ણયામાસ તદ્ધનુઃ ॥ ૫૬॥

તતઃ સીતાં પરિત્યજ્ય રાવણઃ ખડ્ગમાદદે ।
ચિચ્છેદ પક્ષૌ સામર્ષઃ પક્ષિરાજસ્ય ધીમતઃ ॥ ૫૭॥

પપાત કિઞ્ચિચ્છેષેણ પ્રાણેન ભુવિ પક્ષિરાટ્ ।
પુનરન્યરથેનાશુ સીતામાદાય રાવણઃ ॥ ૫૮॥

ક્રોશન્તી રામરામેતિ ત્રાતારં નાધિગચ્છતિ ।
હા રામ હા જગન્નાથ માં ન પશ્યસિ દુઃખિતામ્ ॥ ૫૯॥

રક્ષસા નીયમાનાં સ્વાં ભાર્યાં મોચય રાઘવ ।
હા લક્ષ્મણ મહાભાગ ત્રાહિ મામપરાધિનીમ્ ॥ ૬૦॥

વાક્શરેણ હતસ્ત્વં મે ક્ષન્તુમર્હસિ દેવર ।
ઇત્યેવં ક્રોશમાનાં તાં રામાગમનશઙ્કયા ॥ ૬૧॥

જગામ વાયુવેગેન સીતામાદાય સત્વરઃ ॥ ૬૨॥

વિહાયસા નીયમાના સીતાપશ્યદધોમુખી ।
પર્વતાગ્રે સ્થિતાન્ પઞ્ચ વાનરાન્ વારિજાનના ।
ઉત્તરીયાર્ધખણ્ડેન વિમુચ્યાભરણાદિકમ્ ॥ ૬૩॥

બદ્ધ્વા ચિક્ષેપ રામાય કથયન્ત્વિતિ પર્વતે ॥ ૬૪॥

તતઃ સમુદ્રમુલ્લઙ્ઘ્ય લઙ્કાં ગત્વા સ રાવણઃ ।
સ્વાન્તઃપુરે રહસ્યે તામશોકવિપિનેઽક્ષિપત્ ।
રાક્ષસીભિઃ પરિવૃતાં માતૃબુદ્ધ્યાન્વપાલયત્ ॥ ૬૫॥

કૃશાઽતિદીના પરિકર્મવર્જિતા
    દુઃખેન શુષ્યદ્વદનાઽતિવિહ્વલા ।
હા રામ રામેતિ વિલપ્યમાના
    સીતા સ્થિતા રાક્ષસવૃન્દમધ્યે ॥ ૬૬॥

ઇતિ શ્રીમદધ્યાત્મરામયણે ઉમામહેશ્વરસંવાદે
  અરણ્યકાણ્ડે સપ્તમઃ સર્ગઃ ॥ ૭॥

## ॥ અષ્ટમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ
રામો માયાવિનં હત્વા રાક્ષસં કામરૂપિણમ્ ।
પ્રતસ્થે સ્વાશ્રમં ગન્તું તતો દૂરાદ્દદર્શ તમ્ ॥ ૧॥

આયાન્તં લક્ષ્મણં દીનં મુખેન પરિશુષ્યતા ।
રાઘવશ્ચિન્તયામાસ સ્વાત્મન્યેવ મહામતિઃ ॥ ૨॥

લક્ષ્મણસ્તન્ન જાનાતિ માયાસીતાં મયા કૃતામ્ ।
જ્ઞાત્વાપ્યેનં વઞ્ચયિત્વા શોચામિ પ્રાકૃતો યથા ॥ ૩॥

યદ્યહં વિરતો ભૂત્વા તૂષ્ણીં સ્થાસ્યામિ મન્દિરે ।
તદા રાક્ષસકોટીનાં વધોપાયઃ કથં ભવેત્ ॥ ૪॥

યદિ શોચામિ તાં દુઃખસન્તપ્તઃ કામુકો યથા ।
તદા ક્રમેણાનુચિન્વન્ સીતાં યાસ્યેઽસુરાલયમ્ ।
રાવણં સકુલં હત્વા સીતામગ્નૌ સ્થિતાં પુનઃ ॥ ૫॥

મયૈવ સ્થાપિતાં નીત્વા યાતાયોધ્યામતન્દ્રિતઃ ॥ ૬॥

અહં મનુષ્યભાવેન જાતોઽસ્મિ બ્રહ્મણાર્થિતઃ ।
મનુષ્યભાવમાપન્નઃ કિઞ્ચિત્કાલં વસામિ કૌ ।
તતો માયામનુષ્યસ્ય ચરિતં મેઽનુશ‌ૃણ્વતામ્ ॥ ૭॥

મુક્તિઃ સ્યાદપ્રયાસેન ભક્તિમાર્ગાનુવર્તિનામ્ ।
નિશ્ચિત્યૈવં તદા દૃષ્ટ્વા લક્ષ્મણં વાક્યમબ્રવીત્ ॥ ૮॥

કિમર્થમાગતોઽસિ ત્વં સીતાં ત્યક્ત્વા મમ પ્રિયામ્ ।
નીતા વા ભક્ષિતા વાપિ રાક્ષસૈર્જનકાત્મજા ॥ ૯॥

લક્ષ્મણઃ પ્રાઞ્જલિઃ પ્રાહ સીતાયા દુર્વચો રુદન્ ।
હા લક્ષ્મણેતિ વચનં રાક્ષસોક્તં શ્રુતં તયા ॥ ૧૦॥

ત્વદ્વાક્યસદૃશં શ્રુત્વા માં ગચ્છેતિ ત્વરાબ્રવીત્ ।
રુદન્તી સા મયા પ્રોક્તા દેવિ રાક્ષસભાષિતમ્ ।
નેદં રામસ્ય વચનં સ્વસ્થા ભવ શુચિસ્મિતે ॥ ૧૧॥

ઇત્યેવં સાન્ત્વિતા સાધ્વી મયા પ્રોવાચ માં પુનઃ ।
યદુક્તં દુર્વચો રામ ન વાચ્યં પુરતસ્તવ ॥ ૧૨॥

કર્ણૌ પિધાય નિર્ગત્ય યાતોઽહં ત્વાં સમીક્ષિતુમ્ ॥ ૧૩॥

રામસ્તુ લક્ષ્મણં પ્રાહ તથાપ્યનુચિતં કૃતમ્ ।
ત્વયા સ્ત્રીભાષિતં સત્યં કૃત્વા ત્યક્તા શુભાનના ।
નીતા વા ભક્ષિતા વાપિ રાક્ષસૈર્નાત્ર સંશયઃ ॥ ૧૪॥

ઇતિ ચિન્તાપરો રામઃ સ્વાશ્રમં ત્વરિતો યયૌ ।
તત્રાદૃષ્ટ્વા જનકજાં વિલલાપાતિદુઃખિતઃ ॥ ૧૫॥

હા પ્રિયે ક્વ ગતાસિ ત્વં નાસિ પૂર્વવદાશ્રમે ।
અથવા મદ્વિમોહાર્થં લીલયા ક્વ વિલીયસે ॥ ૧૬॥

ઇત્યાચિન્વન્ વનં સર્વં નાપશ્યજ્જાનકીં તદા ।
વનદેવ્યઃ કુતઃ સીતાં બ્રુવન્તુ મમ વલ્લભામ્ ॥ ૧૭॥

મૃગાશ્ચ પક્ષિણો વૃક્ષા દર્શયન્તુ મમ પ્રિયામ્ ।
ઇત્યેવં વિલપન્નેવ રામઃ સીતાં ન કુત્રચિત્ ॥ ૧૮॥

સર્વજ્ઞઃ સર્વથા ક્વાપિ નાપશ્યદ્રઘુનન્દનઃ ।
આનન્દોઽપ્યન્વશોચત્તામચલોઽપ્યનુધાવતિ ॥ ૧૯॥

નિર્મમો નિરહઙ્કારોઽપ્યખણ્ડાનન્દરૂપવાન્ ।
મમ જાયેતિ સીતેતિ વિલલાપાતિદુઃખિતઃ ॥ ૨૦॥

એવં માયામનુચરન્નસક્તોઽપિ રઘૂત્તમઃ ।
આસક્ત ઇવ મૂઢાનાં ભાતિ તત્ત્વવિદાં ન હિ ॥ ૨૧॥

એવં વિચિન્વન્ સકલં વનં રામઃ સલક્ષ્મણઃ ।
ભગ્નં રથં છત્રચાપં કૂબરં પતિતં ભુવિ ॥ ૨૨॥

દૃષ્ટ્વા લક્ષ્મણમાહેદં પશ્ય લક્ષ્મણ કેનચિત્ ।
નીયમાનાં જનકજાં તં જિત્વાન્યો જહાર તામ્ ॥ ૨૩॥

તતઃ કિઞ્ચિદ્ભુવો ભાગં ગત્વા પર્વતસન્નિભમ્ ।
રુધિરાક્તવપુર્દૃષ્ટ્વા રામો વાક્યમથાબ્રવીત્ ॥ ૨૪॥

એષ વૈ ભક્ષયિત્વા તાં જાનકીં શુભદર્શનામ્ ।
શેતે વિવિક્તેઽતિતૃપ્તઃ પશ્ય હન્મિ નિશાચરમ્ ॥ ૨૫॥

ચાપમાનય શીઘ્રં મે બાણં ચ રઘુનન્દન ।
તચ્છ્રુત્વા રામવચનં જટાયુઃ પ્રાહ ભીતવત્ ॥ ૨૬॥

માં ન મારય ભદ્રં તે મ્રિયમાણં સ્વકર્મણા ।
અહં જટાયુસ્તે ભાર્યાહારિણં સમનુદ્રુતઃ ॥ ૨૭॥

રાવણં તત્ર યુદ્ધં મે બભૂવારિવિમર્દન ।
તસ્ય વાહાન્ રથં ચાપં છિત્ત્વાહં તેન ઘાતિતઃ ॥ ૨૮॥

પતિતોઽસ્મિ જગન્નાથ પ્રાણાન્સ્ત્યક્ષ્યામિ પશ્ય મામ્ ।
તચ્છ્રુત્વા રાઘવો દીનં કણ્ઠપ્રાણં દદર્શ હ ॥ ૨૯॥

હસ્તાભ્યાં સંસ્પૃશન્ રામો દુઃખાશ્રુવૃતલોચનઃ ॥ ૩૦॥

જટાયો બ્રૂહિ મે ભાર્યા કેન નીતા શુભાનના ।
મત્કાર્યાર્થં હતોઽસિ ત્વમતો મે પ્રિયબાન્ધવઃ ॥ ૩૧॥

જટાયુઃ સન્નયા વાચા વક્ત્રાદ્રક્તં સમુદ્વમન્ ।
ઉવાચ રાવણો રામ રાક્ષસો ભીમવિક્રમઃ ॥ ૩૨॥

આદાય મૈથિલીં સીતાં દક્ષિણાભિમુખો યયૌ ।
ઇતો વક્તું ન મે શક્તિઃ પ્રાણાન્સ્ત્યક્ષ્યામિ તેઽગ્રતઃ ॥ ૩૩॥

દિષ્ટ્યા દૃષ્ટોઽસિ રામ ત્વં મ્રિયમાણેન મેઽનઘ ।
પરમાત્માસિ વિષ્ણુસ્ત્વં માયામનુજરૂપધૃક્ ॥ ૩૪॥

અન્તકાલેઽપિ દૃષ્ટ્વા ત્વાં મુક્તોઽહં રઘુસત્તમ ।
હસ્તાભ્યાં સ્પૃશ માં રામ પુનર્યાસ્યામિ તે પદમ્ ॥ ૩૫॥

તથેતિ રામઃ પસ્પર્શ તદઙ્ગં પાણિના સ્મયન્ ।
તતઃ પ્રાણાન્ પરિત્યજ્ય જટાયુઃ પતિતો ભુવિ ॥ ૩૬॥

રામસ્તમનુશોચિત્વા બન્ધુવત્ સાશ્રુલોચનઃ ।
લક્ષ્મણેન સમાનાય્ય કાષ્ઠાનિ પ્રદદાહ તમ્ ॥ ૩૭॥

સ્નાત્વા દુઃખેન રામોઽપિ લક્ષ્મણેન સમન્વિતઃ ।
હત્વા વને મૃગં તત્ર માંસખણ્ડાન્ સમન્તતઃ ॥ ૩૮॥

શાદ્વલે પ્રાક્ષિપદ્રામઃ પૃથક્ પૃથગનેકધા ।
ભક્ષન્તુ પક્ષિણઃ સર્વે તૃપ્તો ભવતુ પક્ષિરાટ્ ॥ ૩૯॥

ઇત્યુક્ત્વા રાઘવઃ પ્રાહ જટાયો ગચ્છ મત્પદમ્ ।
મત્સારૂપ્યં ભજસ્વાદ્ય સર્વલોકસ્ય પશ્યતઃ ॥ ૪૦॥

તતોઽનન્તરમેવાસૌ દિવ્યરૂપધરઃ શુભઃ ।
વિમાનવરમારુહ્ય ભાસ્વરં ભાનુસન્નિભમ્ ॥ ૪૧॥

શઙ્ખચક્રગદાપદ્મકિરીટવરભૂષણૈઃ ।
દ્યોતયન્ સ્વપ્રકાશેન પીતામ્બરધરોઽમલઃ ॥ ૪૨॥

ચતુર્ભિઃ પાર્ષદૈર્વિષ્ણોસ્તાદૃશૈરભિપૂજિતઃ ।
સ્તૂયમાનો યોગિગણૈઃ રામમાભાષ્ય સત્વરઃ ।

કૃતાઞ્જલિપુટો ભૂત્વા તુષ્ટાવ રઘુનન્દનમ્ ॥ ૪૩॥

જટાયુરુવાચ
અગણિતગુણમપ્રમેયમાદ્યં
 સકલજગત્સ્થિતિસંયમાદિહેતુમ્ ।
ઉપરમપરમં પરાત્મભૂતં
 સતતમહં પ્રણતોઽસ્મિ રામચન્દ્રમ્ ॥ ૪૪॥

નિરવધિસુખમિન્દિરાકટાક્ષં
 ક્ષપિતસુરેન્દ્રચતુર્મુખાદિદુઃખમ્ ।
નરવરમનિશં નતોઽસ્મિ રામં
 વરદમહં વરચાપબાણહસ્તમ્ ॥ ૪૫॥

ત્રિભુવનકમનીયરૂપમીડ્યં
 રવિશતભાસુરમીહિતપ્રદાનમ્ ।
શરણદમનિશં સુરાગમૂલે
 કૃતનિલયં રઘુનન્દનં પ્રપદ્યે ॥ ૪૬॥

ભવવિપિનદવાગ્નિનામધેયં
 ભવમુખદૈવતદૈવતં દયાલુમ્ ।
દનુજપતિસહસ્રકોટિનાશં
 રવિતનયાસદૃશં હરિં પ્રપદ્યે ॥ ૪૭॥

અવિરતભવભાવનાતિદૂરં
 ભવવિમુખૈર્મુનિભિઃ સદૈવ દૃશ્યમ્ ।
ભવજલધિસુતારણાઙ્ઘ્રિપોતં
 શરણમહં રઘુનન્દનં પ્રપદ્યે ॥ ૪૮॥

ગિરિશગિરિસુતામનોનિવાસં
 ગિરિવરધારિણમીહિતાભિરામમ્ ।
સુરવરદનુજેન્દ્રસેવિતાઙ્ઘ્રિં
 સુરવરદં રઘુનાયકં પ્રપદ્યે ॥ ૪૯॥

પરધનપરદારવર્જિતાનાં
 પરગુણભૂતિષુ તુષ્ટમાનસાનામ્ ।
પરહિતનિરતાત્મનાં સુસેવ્યં
 રઘુવરમમ્બુજલોચનં પ્રપદ્યે ॥ ૫૦॥

સ્મિતરુચિરવિકાસિતાનનાબ્જ-
મતિસુલભં સુરરાજનીલનીલમ્ ।
સિતજલરુહચારુનેત્રશોભં
રઘુપતિમીશગુરોર્ગુરું પ્રપદ્યે ॥ ૫૧॥

હરિકમલજશમ્ભુરૂપભેદાત્-
ત્વમિહ વિભાસિ ગુણત્રયાનુવૃત્તઃ ।
રવિરિવ જલપૂરિતોદપાત્રે-
ષ્વમરપતિસ્તુતિપાત્રમીશમીડે ॥ ૫૨॥

રતિપતિશતકોટિસુન્દરાઙ્ગં
શતપથગોચરભાવનાવિદૂરમ્ ।
યતિપતિહૃદયે સદા વિભાતં
રઘુપતિમાર્તિહરં પ્રભું પ્રપદ્યે ॥ ૫૩॥

ઇત્યેવં સ્તુવતસ્તસ્ય પ્રસન્નોઽભૂદ્રઘૂત્તમઃ ।
ઉવાચ ગચ્છ ભદ્રં તે મમ વિષ્ણોઃ પરં પદમ્ ॥ ૫૪॥

શૃણોતિ ય ઇદં સ્તોત્રં લિખેદ્વા નિયતઃ પઠેત્ ।
સ યાતિ મમ સારૂપ્યં મરણે મત્સ્મૃતિં લભેત્ ॥ ૫૫॥

ઇતિ રાઘવભાષિતં તદા
શ્રુતવાન્ હર્ષસમાકુલો દ્વિજઃ ।
રઘુનન્દનસામ્યમાસ્થિતઃ
પ્રયયૌ બ્રહ્મસુપૂજિતં પદમ્ ॥ ૫૬॥

ઇતિ શ્રીમદધ્યાત્મરામયણે ઉમામહેશ્વરસંવાદે
અરણ્યકાણ્ડે અષ્ટમઃ સર્ગઃ ॥ ૮॥

## ॥ નવમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ
તતો રામો લક્ષ્મણેન જગામ વિપિનાન્તરમ્ ।
પુનર્દુઃખં સમાશ્રિત્ય સીતાન્વેષણતત્પરઃ ॥ ૧॥

તત્રાદ્ભુતસમાકારો રાક્ષસઃ પ્રત્યદૃશ્યત ।
વક્ષસ્યેવ મહાવક્ત્રશ્ચક્ષુરાદિવિવર્જિતઃ ॥ ૨॥

બાહૂ યોજનમાત્રેણ વ્યાપૃતૌ તસ્ય રક્ષસઃ ।
કબન્ધો નામ દૈત્યેન્દ્રઃ સર્વસત્ત્વવિહિંસકઃ ॥ ૩॥

તદ્બાહ્વોર્મધ્યદેશે તૌ ચરન્તૌ રામલક્ષ્મણૌ ।
દદર્શતુર્મહાસત્ત્વં તદ્બાહુપરિવેષ્ટિતૌ ॥ ૪॥

રામઃ પ્રોવાચ વિહસન્ પશ્ય લક્ષ્મણ રાક્ષસમ્ ।
શિરઃપાદવિહીનોઽયં યસ્ય વક્ષસિ ચાનનમ્ ॥ ૫॥

બાહુભ્યાં લભ્યતે યદ્યત્તત્તદ્ભક્ષન્ સ્થિતો ધ્રુવમ્ ।
આવામપ્યેતયોર્બાહ્વોર્મધ્યે સઙ્કુલિતૌ ધ્રુવમ્ ॥ ૬॥

ગન્તુમન્યત્ર માર્ગો ન દૃશ્યતે રઘુનન્દન ।
કિં કર્તવ્યમિતોઽસ્માભિરિદાનીં ભક્ષયેત્સ નૌ ॥ ૭॥

લક્ષ્મણસ્તમુવાચેદં કિં વિચારેણ રાઘવ ।
આવામેકૈકમવ્યગ્રૌ છિન્ધાવાસ્ય ભુજૌ ધ્રુવમ્ ॥ ૮॥

તથેતિ રામઃ ખડ્ગેન ભુજં દક્ષિણમચ્છિનત્ ।
તથૈવ લક્ષ્મણો વામં ચિચ્છેદ ભુજમઞ્જસા ॥ ૯॥

તતોઽતિવિસ્મિતો દૈત્યઃ કૌ યુવાં સુરપુઙ્ગવૌ ।
મદ્બાહુચ્છેદકૌ લોકે દિવિ દેવેષુ વા કુતઃ ॥ ૧૦॥

તતોઽબ્રવીદ્ધસન્નેવ રામો રાજીવલોચનઃ ।
અયોધ્યાધિપતિઃ શ્રીમાન્ રાજા દશરથો મહાન્ ॥ ૧૧॥

રામોઽહં તસ્ય પુત્રોઽસૌ ભ્રાતા મે લક્ષ્મણઃ સુધીઃ ।
મમ ભાર્યા જનકજા સીતા ત્રૈલોક્યસુન્દરી ॥ ૧૨॥

આવાં મૃગયયા યાતૌ તદા કેનાપિ રક્ષસા ।
નીતાં સીતાં વિચિન્વન્તૌ ચાગતૌ ઘોરકાનને ॥ ૧૩॥

બાહુભ્યાં વેષ્ટિતાવત્ર તવ પ્રાણરિરક્ષયા ।
છિન્નૌ તવ ભુજૌ ત્વં ચ કો વા વિકટરૂપધૃક્ ॥ ૧૪॥

કબન્ધ ઉવાચ

ધન્યોઽહં યદિ રામસ્ત્વમાગતોઽસિ મમાન્તિકમ્ ।

પુરા ગન્ધર્વરાજોઽહં રૂપયૌવનદર્પિતઃ ॥ ૧૫॥

વિચરન્લ્લોકમખિલં વરનારીમનોહરઃ ।
તપસા બ્રહ્મણો લબ્ધમવધ્યત્વં રઘૂત્તમ ॥ ૧૬॥

અષ્ટાવક્રં મુનિં દૃષ્ટ્વા કદાચિદહસં પુરા ।
ક્રુદ્ધોઽસાવાહ દુષ્ટ ત્વં રાક્ષસો ભવ દુર્મતે ॥ ૧૭॥

અષ્ટાવક્રઃ પુનઃ પ્રાહ વન્દિતો મે દયાપરઃ ।
શાપસ્યાન્તં ચ મે પ્રાહ તપસા દ્યોતિતપ્રભઃ ॥ ૧૮॥

ત્રેતાયુગે દાશરથિર્ભૂત્વા નારાયણઃ સ્વયમ્ ।
આગમિષ્યતિ તે બાહૂ છિદ્યેતે યોજનાયતૌ ॥ ૧૯॥

તેન શાપાદ્વિનિર્મુક્તો ભવિષ્યસિ યથા પુરા ।
ઇતિ શપ્તોઽહમદ્રાક્ષં રાક્ષસીં તનુમાત્મનઃ ॥ ૨૦॥

કદાચિદ્દેવરાજાનમભ્યદ્રવમહં રુષા ।
સોઽપિ વજ્રેણ માં રામ શિરોદેશેઽભ્યતાડયત્ ॥ ૨૧॥

તદા શિરો ગતં કુક્ષિં પાદૌ ચ રઘુનન્દન ।
બ્રહ્મદત્તવરાન્મૃત્યુર્નાભૂન્મે વજ્રતાડનાત્ ॥ ૨૨॥

મુખાભાવે કથં જીવેદયમિત્યમરાધિપમ્ ।
ઊચુઃ સર્વે દયાવિષ્ટા માં વિલોક્યાઽઽસ્યવર્જિતમ્ ॥ ૨૩॥

તતો માં પ્રાહ મઘવા જઠરે તે મુખં ભવેત્ ।
બાહૂ તે યોજનાયામૌ ભવિષ્યત ઇતો વ્રજ ॥ ૨૪॥

ઇત્યુક્તોઽત્ર વસન્નિત્યં બાહુભ્યાં વનગોચરાન્ ।
ભક્ષયામ્યધુના બાહૂ ખણ્ડિતૌ મે ત્વયાનઘ ॥ ૨૫॥

ઇતઃ પરં માં શ્વભ્રાસ્યે નિક્ષિપાગ્નીન્ધનાવૃતે ।
અગ્નિના દહ્યમાનોઽહં ત્વયા રઘુકુલોત્તમ ॥ ૨૬॥

પૂર્વરૂપમનુપ્રાપ્ય ભાર્યામાર્ગં વદામિ તે ॥ ૨૭॥

ઇત્યુક્તે લક્ષ્મણેનાશુ શ્વભ્રં નિર્મિત્ય તત્ર તમ્ ।
નિક્ષિપ્ય પ્રાદહત્કાષ્ઠૈસ્તતો દેહાત્સમુત્થિતઃ ।
કન્દર્પસદૃશાકારઃ સર્વાભરણભૂષિતઃ ॥ ૨૮॥

રામં પ્રદક્ષિણં કૃત્વા સાષ્ટાઙ્ગં પ્રણિપત્ય ચ ।
કૃતાઞ્જલિરુવાચેદં ભક્તિગદ્ગદયા ગિરા ॥ ૨૯॥

ગન્ધર્વ ઉવાચ

સ્તોતુમુત્સહતે મેઽદ્ય મનો રામાતિસમ્ભ્રમાત્ ।
ત્વામનન્તમનાદ્યન્તં મનોવાચામગોચરમ્ ॥ ૩૦॥

સૂક્ષ્મં તે રૂપમવ્યક્તં દેહદ્વયવિલક્ષણમ્ ।
દૃગ્રૂપમિતરત્સર્વં દૃશ્યં જડમનાત્મકમ્ ।
તત્કથં ત્વાં વિજાનીયાદ્વ્યતિરિક્તં મનઃ પ્રભો ॥ ૩૧॥

બુદ્ધ્યાત્માભાસયોરૈક્યં જીવ ઇત્યભિધીયતે ।
બુદ્ધ્યાદિ સાક્ષી બ્રહ્મૈવ તસ્મિન્નિર્વિષયેઽખિલમ્ ॥ ૩૨॥

આરોપ્યતેઽજ્ઞાનવશાન્નિર્વિકારેઽખિલાત્મનિ ।
હિરણ્યગર્ભસ્તે સૂક્ષ્મં દેહં સ્થૂલં વિરાટ્ સ્મૃતમ્ ॥ ૩૩॥

ભાવનાવિષયો રામ સૂક્ષ્મં તે ધ્યાતૃમઙ્ગલમ્ ।
ભૂતં ભવ્યં ભવિષ્યચ્ચ યત્રેદં દૃશ્યતે જગત્ ॥ ૩૪॥

સ્થૂલેઽણ્ડકોશે દેહે તે મહદાદિભિરાવૃતે ।
સપ્તભિરુત્તરગુણૈર્વૈરાજો ધારણાશ્રયઃ ॥ ૩૫॥

ત્વમેવ સર્વકૈવલ્યં લોકાસ્તેઽવયવાઃ સ્મૃતાઃ ।
પાતાલં તે પાદમૂલં પાર્ષ્ણિસ્તવ મહાતલમ્ ॥ ૩૬॥

રસાતલં તે ગુલ્ફૌ તુ તલાતલમિતીર્યતે ।
જાનુની સુતલં રામ ઊરૂ તે વિતલં તથા ॥ ૩૭॥

અતલં ચ મહી રામ જઘનં નાભિગં નભઃ ।
ઉરઃસ્થલં તે જ્યોતીંષિ ગ્રીવા તે મહ ઉચ્યતે ॥ ૩૮॥

વદનં જનલોકસ્તે તપસ્તે શઙ્ખદેશગમ્ ।
સત્યલોકો રઘુશ્રેષ્ઠ શીર્ષણ્યાસ્તે સદા પ્રભો ॥ ૩૯॥

ઇન્દ્રાદયો લોકપાલા બાહવસ્તે દિશઃ શ્રુતી ।
અશ્વિનૌ નાસિકે રામ વક્ત્રં તેઽગ્નિરુદાહૃતઃ ॥ ૪૦॥

ચક્ષુસ્તે સવિતા રામ મનશ્ચન્દ્ર ઉદાહૃતઃ ।
ભ્રૂભઙ્ગ એવ કાલસ્તે બુદ્ધિસ્તે વાક્પતિર્ભવેત્ ॥ ૪૧॥

રુદ્રોઽહઙ્કારરૂપસ્તે વાચશ્છન્દાંસિ તેઽવ્યય ।
યમસ્તે દંષ્ટ્રદેશસ્થો નક્ષત્રાણિ દ્વિજાલયઃ ॥ ૪૨॥

હાસો મોહકરી માયા સૃષ્ટિસ્તેઽપાઙ્ગમોક્ષણમ્ ।
ધર્મઃ પુરસ્તેઽધર્મશ્ચ પૃષ્ઠભાગ ઉદીરિતઃ ॥ ૪૩॥

નિમિષોન્મેષણે રાત્રિર્દિવા ચૈવ રઘૂત્તમ ।
સમુદ્રાઃ સપ્ત તે કુક્ષિર્નાડ્યો નદ્યસ્તવ પ્રભો ॥ ૪૪॥

રોમાણિ વૃક્ષૌષધયો રેતો વૃષ્ટિસ્તવ પ્રભો ।
મહિમા જ્ઞાનશક્તિસ્તે એવં સ્થૂલં વપુસ્તવ ॥ ૪૫॥

યદસ્મિન્ સ્થૂલરૂપે તે મનઃ સન્ધાર્યતે નરૈઃ ।
અનાયાસેન મુક્તિઃ સ્યાદતોઽન્યન્નહિ કિઞ્ચન ॥ ૪૬॥

અતોઽહં રામ રૂપં તે સ્થૂલમેવાનુભાવયે ।
યસ્મિન્ ધ્યાતે પ્રેમરસઃ સરોમપુલકો ભવેત્ ॥ ૪૭॥

તદૈવ મુક્તિઃ સ્યાદ્રામ યદા તે સ્થૂલભાવકઃ ।
તદપ્યાસ્તાં તવૈવાહમેતદ્રૂપં વિચિન્તયે ॥ ૪૮॥

ધનુર્બાણધરં શ્યામં જટાવલ્કલભૂષિતમ્ ।
અપીચ્યવયસં સીતાં વિચિન્વન્તં સલક્ષ્મણમ્ ॥ ૪૯॥

ઇદમેવ સદા મે સ્યાન્માનસે રઘુનન્દન ॥ ૫૦॥

સર્વજ્ઞઃ શઙ્કરઃ સાક્ષાત્પાર્વત્યા સહિતઃ સદા ।
ત્વદ્રૂપમેવ સતતં ધ્યાયન્નાસ્તે રઘૂત્તમ ।
મુમૂર્ષૂણાં તદા કાશ્યાં તારકં બ્રહ્મવાચકમ્ ॥ ૫૧॥

રામરામેત્યુપદિશન્ સદા સન્તુષ્ટમાનસઃ ।
અતસ્ત્વં જાનકીનાથ પરમાત્મા સુનિશ્ચિતઃ ॥ ૫૨॥

સર્વે તે માયયા મૂઢાસ્ત્વાં ન જાનન્તિ તત્ત્વતઃ ।
નમસ્તે રામભદ્રાય વેધસે પરમાત્મને ॥ ૫૩॥

અયોધ્યાધિપતે તુભ્યં નમઃ સૌમિત્રિસેવિત ।
ત્રાહિ ત્રાહિ જગન્નાથ માં માયા નાવૃણોતુ તે ॥ ૫૪॥

શ્રીરામ ઉવાચ

તુષ્ટોઽહં દેવગન્ધર્વ ભક્ત્યા સ્તુત્યા ચ તેઽનઘ ।

યાહિ મે પરમં સ્થાનં યોગિગમ્યં સનાતનમ્ ॥ ૫૫॥

જપન્તિ યે નિત્યમનન્યબુદ્ધ્યા
        ભક્ત્યા ત્વદુક્તં સ્તવમાગમોક્તમ્ ।
તેઽજ્ઞાનસમ્ભૂતભવં વિહાય
        માં યાન્તિ નિત્યાનુભવાનુમેયમ્ ॥ ૫૬॥

ઇતિ શ્રીમદધ્યાત્મરામયણે ઉમામહેશ્વરસંવાદે
અરણ્યકાણ્ડે નવમઃ સર્ગઃ ॥ ૯॥

## ॥ દશમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ
લબ્ધ્વા વરં સ ગન્ધર્વઃ પ્રયાસ્યન્ રામમબ્રવીત્ ।
શબર્યાસ્તે પુરોભાગે આશ્રમે રઘુનન્દન ॥ ૧॥

ભક્ત્યા ત્વત્પાદકમલે ભક્તિમાર્ગવિશારદા ।
તાં પ્રયાહિ મહાભાગ સર્વં તે કથયિષ્યતિ ॥ ૨॥

ઇત્યુક્ત્વા પ્રયયૌ સોઽપિ વિમાનેનાર્કવર્ચસા ।
વિષ્ણોઃ પદં રામનામસ્મરણે ફલમીદૃશમ્ ॥ ૩॥

ત્યક્ત્વા તદ્વિપિનં ઘોરં સિંહવ્યાઘ્રાદિદૂષિતમ્ ।
શનૈરથાશ્રમપદં શબર્યા રઘુનન્દનઃ ॥ ૪॥

શબરી રામમાલોક્ય લક્ષ્મણેન સમન્વિતમ્ ।
આયાન્તમારાદ્ધર્ષેણ પ્રત્યુત્થાયાચિરેણ સા ॥ ૫॥

પતિત્વા પાદયોરગ્રે હર્ષપૂર્ણાશ્રુલોચના ।
સ્વાગતેનાભિનન્દ્યાથ સ્વાસને સન્ન્યવેશયત્ ॥ ૬॥

રામલક્ષ્મણયોઃ સમ્યક્પાદૌ પ્રક્ષાલ્ય ભક્તિતઃ ।
તજ્જલેનાભિષિચ્યાઙ્ગમથાર્ઘ્યાદિભિરાદૃતા ॥ ૭॥

સમ્પૂજ્ય વિધિવદ્રામં સસૌમિત્રિં સપર્યયા ।
સઙ્ગૃહીતાનિ દિવ્યાનિ રામાર્થં શબરી મુદા ॥ ૮॥

ફલાન્યમૃતકલ્પાનિ દદૌ રામાય ભક્તિતઃ ।

પાદૌ સમ્પૂજ્ય કુસુમૈઃ સુગન્ધૈઃ સાનુલેપનૈઃ ॥ ૯॥

કૃતાતિથ્યં રઘુશ્રેષ્ઠમુપવિષ્ટં સહાનુજમ્ ।
શબરી ભક્તિસમ્પન્ના પ્રાઞ્જલિર્વાક્યમબ્રવીત્ ॥ ૧૦॥

અત્રાશ્રમે રઘુશ્રેષ્ઠ ગુરવો મે મહર્ષયઃ ।
સ્થિતાઃ શુશ્રૂષણં તેષાં કુર્વતી સમુપસ્થિતા ॥ ૧૧॥

બહુવર્ષસહસ્રાણિ ગતાસ્તે બ્રહ્મણઃ પદમ્ ।
ગમિષ્યન્તોઽબ્રુવન્માં ત્વં વસાત્રૈવ સમાહિતા ॥ ૧૨॥

રામો દાશરથિર્જાતઃ પરમાત્મા સનાતનઃ ।
રાક્ષસાનાં વધાર્થાય ઋષીણાં રક્ષણાય ચ ॥ ૧૩॥

આગમિષ્યતિ ચૈકાગ્રધ્યાનનિષ્ઠા સ્થિરા ભવ ।
ઇદાનીં ચિત્રકૂટાદ્રાવાશ્રમે વસતિ પ્રભુઃ ॥ ૧૪॥

યાવદાગમનં તસ્ય તાવદ્રક્ષ કલેવરમ્ ।
દૃષ્ટ્વૈવ રાઘવં દગ્ધ્વા દેહં યાસ્યસિ તત્પદમ્ ॥ ૧૫॥

તથૈવાકરવં રામ ત્વદ્ધ્યાનૈકપરાયણા ।
પ્રતીક્ષ્યાગમનં તેઽદ્ય સફલં ગુરુભાષિતમ્ ॥ ૧૬॥

તવ સન્દર્શનં રામ ગુરૂણામપિ મે ન હિ ।
યોષિન્મૂઢાઽપ્રમેયાત્મન્ હીનજાતિસમુદ્ભવા ॥ ૧૭॥

તવ દાસસ્ય દાસાનાં શતસઙ્ખ્યોત્તરસ્ય વા ।
દાસીત્વે નાધિકારોઽસ્તિ કુતઃ સાક્ષાત્તવૈવ હિ ॥ ૧૮॥

કથં રામાદ્ય મે દૃષ્ટસ્ત્વં મનોવાગગોચરઃ ।
સ્તોતું ન જાને દેવેશ કિં કરોમિ પ્રસીદ મે ॥ ૧૯॥

શ્રીરામ ઉવાચ
પુંસ્ત્વે સ્ત્રીત્વે વિશેષો વા જાતિનામાશ્રમાદયઃ ।
ન કારણં મદ્ભજને ભક્તિરેવ હિ કારણમ્ ॥ ૨૦॥

યજ્ઞદાનતપોભિર્વા વેદાધ્યયનકર્મભિઃ ।
નૈવ દ્રષ્ટુમહં શક્યો મદ્ભક્તિવિમુખૈઃ સદા ॥ ૨૧॥

તસ્માદ્ભામિનિ સઙ્ક્ષેપાદ્વક્ષ્યેઽહં ભક્તિસાધનમ્ ॥ ૨૨॥

સતાં સઙ્ગતિરેવાત્ર સાધનં પ્રથમં સ્મૃતમ્ ।
દ્વિતીયં મત્કથાલાપસ્તૃતીયં મદ્ગુણેરણમ્ ।
વ્યાખ્યાતૃત્વં મદ્વચસાં ચતુર્થં સાધનં ભવેત્ ॥ ૨૩॥

આચાર્યોપાસનં ભદ્રે મદ્બુદ્ધ્યાઽમાયયા સદા ।
પઞ્ચમં પુણ્યશીલત્વં યમાદિ નિયમાદિ ચ ॥ ૨૪॥

નિષ્ઠા મત્પૂજને નિત્યં ષષ્ઠં સાધનમીરિતમ્ ।
મમ મન્ત્રોપાસકત્વં સાઙ્ગં સપ્તમમુચ્યતે ॥ ૨૫॥

મદ્ભક્તેષ્વધિકા પૂજા સર્વભૂતેષુ મન્મતિઃ ।
બાહ્યાર્થેષુ વિરાગિત્વં શમાદિસહિતં તથા ॥ ૨૬॥

અષ્ટમં નવમં તત્ત્વવિચારો મમ ભામિનિ ।
એવં નવવિધા ભક્તિઃ સાધનં યસ્ય કસ્ય વા ॥ ૨૭॥

સ્ત્રિયો વા પુરુષસ્યાપિ તિર્યગ્યોનિગતસ્ય વા ।
ભક્તિઃ સઞ્જાયતે પ્રેમલક્ષણા શુભલક્ષણે ॥ ૨૮॥

ભક્તૌ સઞ્જાતમાત્રાયાં મત્તત્ત્વાનુભવસ્તદા ।
મમાનુભવસિદ્ધસ્ય મુક્તિસ્તત્રૈવ જન્મનિ ॥ ૨૯॥

સ્યાત્તસ્માત્કારણં ભક્તિર્મોક્ષસ્યેતિ સુનિશ્ચિતમ્ ।
પ્રથમં સાધનં યસ્ય ભવેત્તસ્ય ક્રમેણ તુ ॥ ૩૦॥

ભવેત્સર્વં તતો ભક્તિર્મુક્તિરેવ સુનિશ્ચિતમ્ ।
યસ્માન્મદ્ભક્તિયુક્તા ત્વં તતોઽહં ત્વામુપસ્થિતઃ ॥ ૩૧॥

ઇતો મદ્દર્શનાન્મુક્તિસ્તવ નાસ્ત્યત્ર સંશયઃ ।
યદિ જાનાસિ મે બ્રૂહિ સીતા કમલલોચના ॥ ૩૨॥

કુત્રાસ્તે કેન વા નીતા પ્રિયા મે પ્રિયદર્શના ॥ ૩૩॥

શબર્યુવાચ

દેવ જાનાસિ સર્વજ્ઞ સર્વં ત્વં વિશ્વભાવન ।
તથાઽપિ પૃચ્છસે યન્માં લોકાનનુસૃતઃ પ્રભો ॥ ૩૪॥

તતોઽહમભિધાસ્યામિ સીતા યત્રાધુના સ્થિતા ।
રાવણેન હૃતા સીતા લઙ્કાયાં વર્તતેઽધુના ॥ ૩૫॥

ઇતઃ સમીપે રામાઽઽસ્તે પમ્પાનામ સરોવરમ્ ।

ઋષ્યમૂકગિરિર્નામ તત્સમીપે મહાનગઃ ॥ ૩૬॥

ચતુર્ભિર્મન્ત્રિભિઃ સાર્ધં સુગ્રીવો વાનરાધિપઃ ।
ભીતભીતઃ સદા યત્ર તિષ્ઠત્યતુલવિક્રમઃ ॥ ૩૭॥

વાલિનશ્ચ ભયાદ્ ભ્રાતુસ્તદગમ્યમૃષેર્ભયાત્ ।
વાલિનસ્તત્ર ગચ્છ ત્વં તેન સખ્યં કુરુ પ્રભો ॥ ૩૮॥

સુગ્રીવેણ સ સર્વં તે કાર્યં સમ્પાદયિષ્યતિ ।
અહમગ્નિં પ્રવેક્ષ્યામિ તવાગ્રે રઘુનન્દન ॥ ૩૯॥

મુહૂર્તં તિષ્ઠ રાજેન્દ્ર યાવદ્દગ્ધ્વા કલેવરમ્ ।
યાસ્યામિ ભગવન્ રામ તવ વિષ્ણોઃ પરં પદમ્ ॥ ૪૦॥

ઇતિ રામં સમામન્ત્ર્ય પ્રવિવેશ હુતાશનમ્ ।
ક્ષણાન્નિર્ધૂય સકલમવિદ્યાકૃતબન્ધનમ્ ।
રામપ્રસાદાચ્છબરી મોક્ષં પ્રાપાતિદુર્લભમ્ ॥ ૪૧॥

કિં દુર્લભં જગન્નાથે શ્રીરામે ભક્તવત્સલે ।
પ્રસન્નેઽધમજન્માપિ શબરી મુક્તિમાપ સા ॥ ૪૨॥

કિં પુનર્બ્રાહ્મણા મુખ્યાઃ પુણ્યાઃ શ્રીરામચિન્તકાઃ ।
મુક્તિં યાન્તીતિ તદ્ભક્તિર્મુક્તિરેવ ન સંશયઃ ॥ ૪૩॥

ભક્તિર્મુક્તિવિધાયિની ભગવતઃ શ્રીરામચન્દ્રસ્ય હે
લોકાઃ કામદુધાઙ્ઘ્રિપદ્મયુગલં સેવધ્વમત્યુત્સુકાઃ ।
નાનાજ્ઞાનવિશેષમન્ત્રવિતતિં ત્યક્ત્વા સુદૂરે ભૃશં
રામં શ્યામતનું સ્મરારિહૃદયે ભાન્તં ભજધ્વં બુધાઃ ॥ ૪૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અરણ્યકાણ્ડે દશમઃ સર્ગઃ ॥ ૧૦॥

અરણ્યકાણ્ડં સમાપ્તમ્ ॥

Encoded by Nagaraj Balijepalli nagaraj at iastate.edu
Proofread by Sunder Hattangadi
Revised by Agne Easwaran easwaranpsa at rediffmail.com
and ahimsasoldier at gmail.com

*adhyAtmarAmAyaNe araNyakANDam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*